नं० : १२६ - घ

महाभाष्यप्रदीपविवरणम्

( कैय्यट व्याख्यानम् )

पत्राणि २००

1 - 2 अध्यायौं ) अपूर्ण

नं० : १२-६ - घ

महाभाष्यप्रदीपविवरणम्

(कैय्यट व्याख्यानम्)

~~पत्राणि~~ २००

१-२ अध्यायौ (अपूर्ण)

प. २६६

॥ महाभाष्यव्याख्यानस्य कैयटस्य विवरणं मेतत्॥

केट·वि || ||श्रीगणेशाय नमः|| ||आरब्धं ग्रन्थं चिकीर्षुश्चिकीर्षितस्य ग्रंथस्याविघ्नेन समाप्त्यै शिष्टाचारपरि
१ प्राप्तमंगलाचरणं कृतं शिष्यशिक्षार्थं ग्रंथे निबध्नाति सर्वाकारमिति। परमात्मानं प्रणम्य भजे यदात्मजो
हकेपदोयथागमं विवृतिर्भवं विवास्य इतिसंबंधः। अत्र वक्ता प्रणम्येन पूर्वकालतया प्रणामस्य हेतुत्वं व
दता ग्रंथारंभे वप्पकर्तृकत्वं सूचितम्। परमात्मानं जगदुपादानादिकारणं तथा साधयति। सर्वाकारमि
ति। सर्वस्य कार्यजातस्याकारः स्वरूपमुपादानमिति यावत् उपादानं हि कार्यस्य स्वरूपम्। उपादानत्वेव
तस्य यतो वेदादिश्रुतिः प्रमाणम्। परमात्मनः कारणत्वेपि मूलकारणतया महदादिवैलक्षण्यात् स्वस्व
रूपं नास्तीत्याह निराकारमिति। निर्गतस्वरूपान्तरमित्यर्थः। अथवा सर्वगं बः सर्वरसइति नेति नेति श्रु
तिद्वयप्रतिपादितारोपापवादौ विशेषणद्वयेन दर्शितौ। एतस्मिंश्च पक्षे बहुव्रीहिसमासः। आद्ये स रूम·
र्वेक्षतेतिश्रुतेः कर्तृत्वमपि तस्येत्यभिसंधायाह विश्वाद्यरूपमिति विश्वमद्यं रूपं यस्येति बहुव्रीहिः। १
विश्वं साक्षात्कुर्वन्नपि नास्मदादिवदिन्द्रियद्वारा किंतु स्वरूपचैतन्येनैवेत्यभिसंधायाहातीन्द्रियमिति। वि
गतेन्द्रियमित्यर्थः। अत्र च परपत्यवकुः सम्प्रणोत्पकर्णप्रत्यादिश्रुतिः प्रमाणम्। न चास्य कारणत्वेपिमा

यावदनिर्वचनीयत्वमित्याह सदिति। सच्छब्देनासद्विलक्षणं विवक्षितम्॥ असच्छब्देन सद्विलक्षणम्।
तथा च सदसद्रूपतामनिर्वचनीयतामतीतमित्यर्थः॥ अथवा सच्छब्देन पृथिव्यादित्रयमुच्यते असच्छब्देन
वाय्वाकाशौ तेन भूतपंचकरूपतामतीतमित्येकं भवति किमित्यस्मदादिभिरेतादृशं नापरोक्षीक्रियत इ
त्यत्राह। अदृश्यमिति। न कस्यापि दृष्टिपरोक्षमित्यत्राहंता नेति॥ तत्त्वमस्यादिवाक्यजनितोऽखंडाद्वितीयसच्चि
दानंदब्रह्माकारो वृत्तिसाक्षात्कारो ज्ञानं तत्र संप्रत्ययमित्यर्थः॥ ननु पुराणादौ नारायणादीनां पालनादिकर्तृत्वं
श्रूयत इत्याशंक्य तेन तेन रूपेण स्थितः परमात्मैवेत्येकं तत्त्वमित्याह। नारायणमिति। नारायणं ब्रह्माविष्णुमहेश्वराः स
सर्वविदिति सर्व
ज्ञ ५
वशः त्वं ब्रह्मा च्युतं सर्वकल्पेष्वेव कर्तृत्वेनोपपादयंति सर्वविघ्नेनास्त्वविद्यां वा ग्रूपेण प्रवर्त्तयितुं वागधिदेव
तां प्रणमति। पुरुषाइति। देवत्वं पांडित्यं यथासंप्रदायं विधाय पश्चात्कं तत्र संप्रदायस्य वृद्धिं द्योतयन देवता
नमस्कारवद्गुरुनमस्कारस्यापि ग्रंथारंभौपयिकत्वं दर्शयति पदेति। श्रीमत इत्यनेनोहापोहकौशलसंपद
शितं यदर्थं मंगलाचरणं कृतं तन्निर्दिशति महे ति। आरभ्ये यत्नेवा हेतुमामहमहे तिय यंथतोर्थतश्च मह
त्वम्॥ अवारपारयोर्भवो वारपारीणः॥ शास्त्रावारपारेति खः॥ औद्धत्यं परिहरति भाष्याब्धिरिति कथं तर्हि वि
अवारपारात्यंतानुकामं सर्वगामीत्यनेन मत्ययइति परे·
मयूरव्यंसकादिसमासो रूपकं चेति बोध्यं·१

कै·वि·व वृत्तिज्ञवंविधास्यादित्युक्तमित्यत्राह।तथापीति।शनैरित्यनेनाल्पंतंग्रंथसंकोचोनास्तीत्युक्तं।पंगुवदित्यनेन
२ व्याख्येयाल्पंतापरित्यागोव्याख्येयस्यविस्तृतत्वंवसूचितं अन्वर्थशब्दानुशासनमितिनतावत्पाणिनेःसूत्र
वृद्धिरादैजितिसूत्रोपक्रमः।अतएवचतत्रमंगलमाचरितम्॥अइउणित्यादिवेष्णुरमितिस्मर्यते।नचेह्यन्यःसूत्रकारो
2 स्तियेनेतत्प्रणीतमिदंसूत्रंस्यात्।नापिवार्त्तिकं।तद्धिमंगलाचरणपूर्वकंसिद्धेशब्दार्थइत्यादिनापिपतंजले
र्वक्तिंपदव्याख्यानपूर्वकंस्वस्यैवसूत्रकर्तृकत्वात्ख्यानायोगात्।भाष्यत्वादुपपत्स्यतइतिचेत्तन।नहिस्वपदव्याख्या
नमात्रेणभाष्यत्वंकिंतुसूत्रार्थवर्णनेनापि।नचेहतथा।तस्माद्युक्तमेतत्।इत्यत्राहभाष्यकारइति।अनेनभाष्यत्वा
त्स्वपदव्याख्यानमुपपन्नमित्युक्तंभवति।सूत्रार्थवर्णनाभावेनाभाष्यत्वमुक्तंपरिहरतिप्रयोजनमाहेति।एतद्वो
पलक्षणं।शब्दशब्देनशास्त्रविषयस्यापिनिर्देशात्शास्त्रारंभान्यथानुपपत्तिसूचिताधिकारिवर्णनाद्भाष्यत्व
मुपपन्नमितिभावः।सूत्रकारवार्त्तिककाराभ्यामनुक्तंकिमित्युच्यतइत्यत्राहविवरणकारत्वादिति।ननुवृद्धिरादैजि कप्र·
त्यादावेवोच्यतांतत्राह॥ ॥व्याकरणस्येति।अपोद्घाततयासमस्तशास्त्रारंभहेतुतयात्रैवाभिधानंयुक्तमितिभावः। २
ननुरक्षोहागमलघ्वसंदेहाःप्रयोजनमित्यादिनाप्रयोजनंवक्ष्यतीत्यत्राहमारणादिति।विशेषणाकृत्स्नंदर्शयति।प्रयोजने

ति॥ उत्तरग्रंथस्योपयोगमाह स्ववाक्यमिति॥ नन्वविकृतं शब्दानुशासनमित्येवोच्यतां तत्राहाथशब्दं व्याचष्ट इति॥ अ
त्राथशब्दं मंगलार्थं प्रयुज्य तस्य व्याख्यानमनुचितमिति भावः॥ नन्वेवमथशब्दोऽधिकारार्थः प्रयुज्यत इति वक्तव्यं किमर्थ
मथमित्युक्तमित्याशंक्येवं व्याख्यमानेऽन्यत्रानंतर्याद्यर्थांतरेऽथशब्दप्रयोगाद्व्याख्यानमेतदसमंजसं स्यादित्ययमित्युक्त
मित्यभिसंधायाह॥ तदवयवमिति॥ इतिशब्दस्योपयोगमाहेतीति॥ स्वरूपेऽवस्थानस्य प्रयोजनांतरमाह स्वरूप इति॥ शब्द
इति किमर्थमुक्तमित्यत्राह॥ शब्द इति॥ अर्थपदार्थकत्वापायायेति शब्दप्रयोगादिति भावः॥ निपातानां द्योतकत्वादभिधेयवा
च्यर्थशब्दोऽनुपपन्न इत्यत्राहाधिकार इति॥ अधिकारप्रतिपादनं चेत्र द्योतकत्वात्स्वं प्रयुक्त्या प्रतिपादितमित्यत्राह प्रस्ताव इति॥ प्रारंभ
इत्यर्थः॥ वाचकत्वमेव किं न स्यादित्यत्राह निपातानां चेति॥ वाचकत्वे हि निपातानामुपास्य नेयुरुरित्यादौ धातोरकर्मकत्वात्क
र्मणि लो न स्यात्॥ तथा लिंगसंख्याद्यन्वयार्थत्वं च स्यात् द्वंद्वस्य तु न भवतीत्यादिविभागो न स्यादिति भावः॥ शब्दानुशासनमित्यादि
भाष्यं वाक्यव्याख्यानपरमित्याहाथशब्देनेति॥ अधिकारार्थोऽप्यथशब्दः किमिति प्रयुज्यते तत्राहानेकेति॥ नन्वाकरणस्य प्र
योजनमनेनाभिधीयते चेऽनावसाधनमनुशासनपदं वक्तव्यं तथा च न शास्त्रशब्देन सामानाधिकरण्यमित्यत्राह आकर मि२
णस्य चेति॥ अन्वर्थमिति अनेन प्रयोजनाभिधानमनुपपद्यत इत्युक्तो नामशब्देन करणसाधनं तथा शास्त्रशब्देन सामानाधिकर

×समुच्चयादिशब्दयोग इव चादियोगे पिघटादेः षष्ठी स्यात् समुच्चिताभिधाने तु ४

वै. वि. (रपत्यत्राह व्याकरणस्य चेति। अन्वर्थमित्यनेन प्रयोजनाभिधानमुपपद्यत इत्युक्तं। नाम शब्देन कारणस्य चेति। अन्वर्थमि)
३ (साधनतया शास्त्रशब्देन सामानाधिकरण्यमुपपद्यत इत्युक्तं भवति। शास्त्रत्वं वा अस्य व्याकरणस्य वक्तुं शब्दविद्यास्थानांतःपाति
त्वाद्वृद्धायोग रूढ्या व्याकरणेन साधुशब्दानुशासनात्प्रकृतिप्रत्ययाद्युपायसाधनाद्वा साधुशब्दान्निर्युक्त शिष्यजनशास
३ नाद्वा वोद्धव्यं। ननु शब्दानुशासनमिति समासो नोपपद्यते उभयप्राप्तौ कर्मणीति षष्ठ्याः कर्मणि चेति समा[illegible] स निषे
धादित्यत्राह नवेति। कर्तृकर्मणोः कृतीत्यनेनापि षष्ठ्याः समासनिषेधः कस्मान्न भवतीत्यत्राह अप्रयुक्तस्यानाद्विविदिति
च। शब्दस्यैव सर्वत्वात् कर्मणीत्यस्याप्यविहितायाः षष्ठ्याः समासप्रतिषेध इति भावः केषां शब्दानामित्यनुपपन्नमिव। तत्पर
त्वात्कालस्येत्यत्र शब्दानां ध्वनिरिति। व्यंग्यमात्रे शब्दशब्दप्रयोगान्नादस्याद्विरूपाद्यात्मके पुव्यंजके ध्वपि प्रवृत्तो तेषामेवा
नुशासनेस्यानिष्टत्वादित्यत आह शब्देति। त्रैविध्यव्यवहारेध्वनावपि शब्द शब्दप्रयोगाद्दौर्बल्यविवक्षया पेनवशब्दा
नां ध्वनिरित्यत्र व्यंजकमात्रेण प्रयोगोपपन्नोरितिभावः। तथापि व्रीहीन्प्रोक्षतीत्यादौ सामान्यशब्दस्याप्यपूर्वीयेषु विशेषेषु
[illegible]प्रवृत्तिवद्वर्णा[illegible]त्मके विशेषे प्रवृत्तिर्भविष्यतीत्यत आह यिनेति। व्रीहिशब्दस्य प्रकरणान्न विशेषे प्रवृत्तिरिति भावः। उत्तरप हृष्य. ३
दार्थसंसृष्टस्य पूर्वपदार्थस्य कथं सर्वनाम्ना परामर्शः शब्दानामिति च किमर्थमित्यत्राह तेनेति परामर्शसिद्ध्यर्थं शब्दानामित्युक्त
ए.

=ब्रह्मसादिविभीनिकाकथाशितादिशब्दानामनुशासितुमशक्यत्वात् शकुनागमगंधर्ववेदादिभिरेव तन्निर्णयाच्चेति भावः।२= साधारणेति। अन्यथासर्वाशिरवीत्यादयएवोदाहार्याः स्युः।५=

×वेदांगत्वादिसनेन तंत्रीशब्दादीनामविषयतासूचिता। नचवेदांगत्वाद्वैदिका एव विषयाः स्युः। तत्रतत्रभाषायांछंदसीत्याद्यभियुक्तोक्तिपादविषयत्वात्॥२

रूपमिति भावः॥ इदमुक्तं भवति उपसर्जनमपि तद्वाचकेन पृथक्कृतं सर्वनाम्ना परामृश्यत इति सामान्यशब्दोपि सामर्थ्याद्वि
शेषे वर्तत इत्यभिसंधायाह। सिद्धान्तेति। व्याकरणस्य वेदांगत्वमागमसिद्धमनुभवसिद्धं च। एतच्चोत्तरत्र प्रपंचयिष्यामः॥ ननु
प्रत्यक्षप्रत्यभिज्ञानाद्वैदिकानां बहूनां लौकिकत्वे स्थिते स्तोकं भेदमपेक्ष्यात्यंतभेदाश्रयं पृथगभिधानं न युज्यत इत्याशं
क्याह वैदिकानामिति। प्राधान्यमुपपादयति। तेषामिति। तत्र प्रपंचं शेषत्वं वा योपि भवतीति स यत्नेन परिहरणीयः॥
आदिवादेनापि प्राधान्यं तरमाह। अथवेति। नन्वयं परमार्थः॥ लौकिकास्तावदित्यत्र लोकवेदसाधारणोदाहरणार्हो रक्षादित्येवमा
दीनां वैदिकत्वेपि लोकेपि प्रयुज्यमानतया लौकिकोदाहरणत्वमुपपन्नमित्यभिसंधाय पदोदाहरणे तात्पर्यमाह तत्रेति
भाषायामेव तु प्रयुज्यमानानि प्रसंगादुक्तान्येवेति नोदाहृतानि। शन्नो देवीरित्यादीनां लौकिकत्वेपि वेदेपि प्रयुज्यमा
नतया वैदिकोदाहरणत्वमुपपद्यत इत्यभिसंधाय वाक्योदाहरणे तात्पर्यमाह। वेदेत्विति। प्रायेण लौकिका एव वैदिका
इति च प्रदर्शनाय संभवेपि पुरुषार्थं छंदसा निगमान्तिवत्यादीनि नोदाहृतानि। नियतस्वरत्वाभिप्रायेणानुदाहृतत्वा
द्वा स्वरनियमादेर्लौकिकसिद्धत्वाभावेपि कुतः सिद्धं लोकतदुत्पन्नेन नख्याघातः। नचाभियुक्तैः प्रतिपदपाठेषु वैदिकेषु नलक्षु
णेन प्रयोजनमस्तीति वाच्यं॥ प्रमादादशक्तेर्वा वैदिकानपभाषन्नतेभ्यश्चान्यत एव वा पत्रपाठानङ्गहलीषु। तेषु चान्यैरुप
लभ्यैर्विवदमानेषु मध्यस्थानां संदेहः स्यात्॥ तन्निवृत्त्या विवदमानानां च विपर्यासनिवृत्त्या सर्वशाखसाधारणा। सि

×अयंभावः॥शब्दपरत्वाभिप्रायेणास्यगौरितिप्रयोगस्यावाञ्ज्ञातिव्यक्त्योर्विवात्मश्रोतव्यइत्यादौशब्दार्थयोरपिअभेदेनव्यवहारात्‌देवंगुणक्रिययोर्व्यक्त्यभेदेनतद्भिन्नाभिन्न×
×स्यतद्भिन्न[redacted]त्वमितिन्यायाच्छब्दाभिन्नव्यक्त्यभिन्नानांजातिगुणक्रियाणांशब्दाभिन्नत्वा[redacted]योपदेकस्मिन्ज्ञानेप्रतिभाससमानेपृथक्‌शब्दशब्दवाच्यइति॰×
×यथा॰व्यक्तिःशब्दाद्व्यतिरिक्ताशब्दाविषयकप्रतीत्यविषयत्वाद्यद्यदविषयकप्रतीत्यविषयस्तत्तद्व्यतिरिक्त॰यथा गौरश्वाविषयकप्रतीत्यविषयःसोऽभिन्नश्चेत्सन्नुमानाच्छब्दस्य॥ सामान्यः गुणादिभिस्तुनशब्द
=वाच्छुमनोभेशक्यास्मादितस्यशब्दस्यभावाम्युपगमात्‌॰१=

कै॰वि॰ ५ दंलक्षणमर्थवत्‌॥ अयंगौरिति॥ श्रोत्रग्राह्यगोरयंशब्दइतिचेंद्रियांतरग्राह्येऽर्थेव्यवहारदर्शनादित्यर्थः॥ गौरित्यनेनवि
वक्षितेकिमधिकरणमित्याकांक्षायामाह॥ विज्ञानइति॥ अत्रशब्दार्थमाह॥ प्रतिभाससमानेषु॥ तिामच्छइत्यर्थः॥ कानितानिवर्ती
त्याकांक्षायामाह॥ षु॥ तिभाससमानेषु॥ तिामच्छइत्यर्थः॥ कानितानिखो तान्येवेति॥ नन्वयत्रछद्योःसमानविषयत्वाप्र
छद्भ्यनपुंसकलिंगार्थाभिधापित्वा त्रछद्वेनापितथैवभवितव्यमितितिसइतिपुंल्लिंगनिर्देशोऽनुपपन्नइत्यत्राह॥ उद्दिश्य
मानेति॥ सिद्धवत्कीर्तनमुद्देशः॥ प्रतिपाद्यतयाभिधानंप्रतिनिर्देशः॥ सामान्यमनिर्दिकृत्वेसतिश्रोत्रेंद्रियग्राह्यत्वे
शब्दस्यलक्षणेस्थितेऽर्थस्यप्रख्यवादीदृष्टांतःशब्दत्वमिसंधायाह॥ भिन्नेति॥ केनधर्मेणानर्हितत्प्रसिद्धमित्यत्राह॥ अ
पित्विति॥ गुणावस्थायंताभावानधिकरणनयेतिभावः॥ ननुमुख्यवृत्तिपरित्यज्यवृत्त्यंतरेणाश्रयमेवशब्दानुशासन
मित्यत्रशब्देनविवक्षितमिति॥ नेत्याह॥ यदिवेति॥ लक्षणायांप्रयोजनाभावादितिभावः॥ श्रोत्रग्राह्यभावादेवक्रि
यादीनांशब्दत्वेनिरस्तेकिमुत्तरयंथेनेत्यत आहानेनेति॥ चेष्टादीनांप्रसिद्धांतरावगमायेतिभावः॥ शंकाबीजंदर्शयति॥
गो शब्देतिभाष्येसामान्यसद्भावेभिन्नेष्वभिन्नमितिवदताप्रत्यक्षंप्रमाणमुपन्यस्तंभिन्नेष्वित्याद्युच्छिन्नमित्यंतेनानित्यत्वेसत्ये
कत्वेचानेकवृत्तित्वंलक्षणंसामान्यस्योक्तं॥ उपमानवाविनोमूलशब्दस्यप्रयोगानुपपत्तिंपरिहरतिसत्त्वेति॥ भाष्ये
×एकत्वमिति॰अनेकसमवेतत्वस्याप्युपलक्षणं॰नित्यत्वेनसंयोगनिरासः॥ एकत्वेनघस भिन्नप्रसक्तरूपप्रमाणंदर्शितं॰१
×अयंभावः॥ भिन्नेंद्रियग्राह्यत्वाच्छब्दार्थयोर्भेदेसिद्धेप्रतीत्यभेदोनपरमार्थतःसमसत्ताकयोर्भेदाभेदयोर्विरुद्धत्वात्‌॰अन्यथा[redacted]करीसासत्तागुणत्वाद्यभेदा×
×त्सुखदुःखस्वर्गनरकादेरप्यभेदापत्तौप्रवृत्तिनिवृत्तिव्यवस्थानस्यात्तस्याच्छभेदस्य[redacted]कल्परूपमभेनिवृत्तिः॥ ज्ञानादीनांव्युत्पन्नानवाद्यात्म्यंसंबंधोविवक्षितः×
×द्रव्यग्राहकेंद्रियभिन्नेंद्रियग्राह्यत्वादित्यर्थः॥ नचैवंव्यभिचारः॥ शब्दोद्भवभेदत्यागाःकदाचन्दयम्‌ग्राहकेंद्रिय(१)भिन्नेंद्रियग्राह्यत्वनतत्रप्रतियोगि
×द्रव्यपदकोपप्रयोगः॥ द्रव्यग्राह्यप्रतियोगिकभेदवत्त्व॰ग्राह्यग्राहकेंद्रियभिन्नेंद्रिय[redacted]ग्राह्यत्वात्‌॰यत्रयत्र[redacted]केंद्रियभिन्नेंद्रियग्राह्यत्वंतत्रतत्रग्राह्यप्रतियोगिकभेदवत्त्वंयथागंधरसादिषु॰६=

=इतिभावः इति यच्चुनाक्तोक्षपुटव्यापारजन्यचरमवर्णसन्निकाले वीचीतरंगन्यायेन पूर्वपूर्ववर्णजन्यतत्तद्वर्णसंस्कारावासनानुरूपो स्सेषेवेति तन्न एवमपि समष्टुसमुदायानां पौर्वापर्येणावस्थाने प्रमाणाभावात्स नोदन्ना रूसा दोषसमाएवीसादोषोऽदुरुद्धर एवेति ५=

भा० वा० २

क्ति शब्दे न जातिरभिधीयते॥ पूर्वस्मात्सम्प्रादस्य विशेषमाह इत्यादिष्विति। नन्वर्थप्रत्यायकानां वर्णानामुच्चार्यमाणा

नामेकत्वाद्येनेत्येकवचनमनुपपन्नमित्यत आह वैयाकरणा इति। वर्णव्यतिरिक्तं पदमभ्युपगच्छन्ते कैकस्य वर्णस्य वा

चकत्वं ब्रूयात्समुदायस्य वा नाद्य इत्याह द्वितीयेति। द्वितीयेऽप्युत्पद्यमानानां समुदायो भिव्यज्यमानानां वा। आद्ये

पि किं क्रमेणोत्पन्नित्युगपद्वा नाद्य इत्यत आह प्रत्येकमिति। प्रत्येकमुत्पन्नेपि पश्चे समुदायाभावादित्यन्वयः। उत्पन्नध्वस्त

त्वादिति भावः। द्वितीयं दूषयति योगपद्येति। द्वितीये द्वितीयं दूषयति। अभिव्यक्तीति। अस्तु तर्हि अन्त्य स्याभिव्यक्तिप

क्षयोरन्यतरस्मिन्पूर्ववर्णानुभवजनितसंस्कारसध्रीचीनांत्यवर्णानुभवजनितसंस्कारहेतुकैकस्मृत्युपारूढानां वर्णा

नां वाचकत्वमित्यत आह। एकेति। तस्यानित्यत्वेन सर्वदार्थप्रत्यायकत्वं निरस्यति। नादेति। नन्वयेन क्रमेणानुभू

ता वर्णास्तेनैव क्रमेणास्मृत्युपारूढानां वर्णानां वाचकत्वेनार्थप्रतीत्यविशेषप्रसंगः अन्यथा भवद्भिरपि वर्णानां

स्फोटाभिव्यंजकत्वाभ्युपगमात्कथं पूर्वोक्तदोषान्निस्तारो भवतामपीत्यत आह विस्तरेणेति। इदमत्राकूतं। इदमेकं

पदमिदमेकं वाक्यमिति प्रत्ययः स्फोटसद्भावे प्रमाणं नचायं वर्णगोचरः तेषामनेकत्वे नैकमिति प्रत्ययासंभव

नत्वायोगान्नचायं भ्रान्तः। बाधाभावान्नचभिन्नानामपि वृक्षाणामेकदेशसंबंधितयैकमिदं वनमिति यथोपा

×क्रमेणानुभूतानां युक्रमेणापि स्मरणादर्शनाभेन क्रमेणानुभूता वर्णास्तेनैव क्रमेण स्मरणमित्यर्थे दृढतरप्रमाणाभावाच्चार्थप्रतिपत्त्यविशेषप्रसं×

×गो दुरुद्धरः। प्रथमतु प्रथमवर्णेनाभिव्यक्तः स्फोटो द्वितीयादिवर्णानुभवे [illegible] :केवलमभिव्यक्ततरः क्रियते पद्मरागादिरत्नतत्वपरीक्षणवन्नतु सकल×

×वर्णानां स्मृत्युपारूढानामभिव्यंजकत्वमिति नदोषः। न च व्युत्क्रमेण स्मरणाभावे दृष्टविशेषो नियामकः। नच कालिकतत्संयोगोच्चारणेनावदद्धेकत्वेनापेक्ष्यये:

=पूर्वपूर्ववर्णाभिव्यक्तिजन्यातिशयसहकृतचरमाभिव्यक्तिविशिष्ट =नचवर्णव्यंग्यस्फोटवाच्यमर्थं वर्णा एव साक्षात्स्फोटमभिव्यंजंतु दृष्टपूर्ववर्णैरभिव्यक्तस्यान्तरे नत्ववर्णैः [illegible] :स्फुटतराभिव्यक्तीकरणादिति वाच्यं पदं वा चकं मर्योवा [illegible]

=स्फोटस्यापि न व्यञ्जनकात्मकोपलनानुरू० २

(तत्समासैकतादा॰)

कै॰ वि धिकएकत्वप्रत्ययः नथैकार्थप्रत्ययजनकत्वेनौपाधिको भविष्यतीति वाच्यं। विकल्पासहत्वात् स एकोर्थः किमवि
५ शिष्ट उत विशिष्टः आद्ये राजपुरुष इत्यादौ विशिष्टार्थप्रत्यायके एकमिदं पदमिति बुद्धिर्न स्यात्। द्वितीये तु घट इत्या
देरेकपदबुद्ध्यालंबनत्वं न स्यात्। क्वचित्कश्चिद्दित्थाश्रीयमाणो एकं पदमेकं वाक्यमिति ज्ञानयोरेकविशिष्टार्थोपा
धिकत्वात् क्वचिद्विशेषप्रसंगः। एकार्थप्रत्ययजनन्नोपाधिलक्षैकपदव्यपदेशानेकबोधिताविशिष्टार्थानां संस
5 र्गविशिष्टैकार्थप्रत्ययजननोपाधिकत्वेन विशेष एकं पदमित्यस्मादेकं वाक्यमित्यस्येति चेत्। पुनरपि समासप
द विशेषप्रसंगः विभक्त्यंतानेकतिशब्दाण्यलुकसमासपदाद्विशेषप्रसंगः। ~~[illegible]~~
एवमेकस्मिन्नुपाहृत्वस्याप्यौपाधिकत्वं निरसनीयं। तस्मादेकमिदं पदमिति प्रत्ययालंबनयावर्णातिरिक्तपदम
स्तीति सिद्धं। वर्णपदातिरिक्तं च वाक्यं न वेत्। तच्छ शब्दस्यानुशासनात्प्रातिज्ञाविरोधः। विशिष्टक्रमवद्व्यंजकवर्णा
नुशासनमेव व्यंग्यानुशासनोपाय इति तद्द्वारा व्यंग्यस्यैवानुशासनात्। यथा लिपिप्रतिपादनमक्षरप्रतिपादनो ह॰ स
पाय इति तन्निपादनेनाक्षरस्यैव प्रतिपादनं तद्वत्। यथा वलिपिष्वेवाक्षरबुद्धिरबुधानां तथा व्यंजकेष्वेव पदादिबुद्धिः। ५
नन्वेवं तस्य तात्वोष्ठप्रयत्नापारविषयत्वाभावाच्चारितेनेत्यजपयन्नमित्यत आह प्रकाशितेनेति। अभिव्यंजकैरित्य

×शब्दशब्देनार्थप्रकरणादिनिरपेक्षेण ध्वनिरुच्यते प्रतीतः प्रसिद्धः पदार्थ इति कर्मधारयः कुत्सायां कः कुत्सितोयं प्रश्नानर्हः प्रसिद्धत्वादित्यर्थः। तथा चाथवेत्यादिग्रंथः प्रश्ना×
×नर्हत्वमात्रप्रतिपादनपर इति ज्ञेयं·×३ ×एवं च भाष्ये ध्वनिशब्देन श्रोत्रग्राह्यत्वसाम्यात्स्फोट एवोच्यत इति भावः।२×

र्थः। न चैकेनैवाभिव्यक्तत्वादितरेषामानर्थक्यं निरवयवस्य सर्वात्मनाभिव्यक्तत्वेपि स्फुटतराभिव्यक्त्यर्थत्वादितरे
षां। अप्रसिद्धां ततां परिहरति। अन्यत्रेनीति। तत्परस्तत्कालस्येत्यादावित्यर्थः। भाष्ये प्रतीतपदार्थक इत्यत्र शब्द इत्यनु
षंगः। कथमित्यत आह।। लोक इति विधीत्यादिर्वोद्यपरिहारोस्पष्टो। किमिति नित्यत्वे फलं न वाच्यं। अकरणे प्रत्यवा
यः स्यादिति प्रश्नरूपपत्तेः। काम्यत्वे तु प्रवृत्तिसिद्धये फलविशेषः तत्कामस्य वक्तव्य इति भावः। भाष्यं चैवं योज्यं
निपातानामनेकार्थत्वात्पुनःशब्दश्चिदर्थे। तथा च शब्दानुशासनस्य कानिचित्प्रयोजनानि सन्ति उत नेति। अत्र सत्वे
नित्यत्वं सत्वे तु काम्यत्वं। न च प्रयोजनप्रश्नद्योतनाय पुनःशब्दः। शब्दानुशासनस्येत्यनेन गतत्वात्। प्रयोज
नशब्दस्य प्रयोजकपरतया सम्मूलमप्यमूलं व्याकरणमित्यपि प्रश्नः। अत्रापि भाष्ययोजना पूर्ववत्। प्रदीपे योजना
तु संध्योपासनादिवद्व्याकरणस्य मूलमध्ययनमधीयमानं नित्यं वेदरूपं। कर्म क्रियमाणं स्मृतरूपं वेति। अ
थ काम्यं कर्मेद्धातः करणं व्याकरणस्य नास्त्यागमरूपं मूलमित्यर्थः। प्रयोजनं प्रश्नोत्तराभिप्रायवर्णने प्रदीपः
सुयोजः। द्वितीयप्रश्नोत्तराभिप्रायवर्णने पुरुषार्थो धर्मस्तत्साधनत्वान्तत्प्रमाणतां परंपर्येणागमस्य व्याख्याने
नेति योज्यं। भाष्ये प्रयोजनमिति च प्रयोजकफलपराणां पुल्लिंगनपुंसकलिंगानां नपुंसकमनपुंसकेन

= प्रकारांतरेणे ति· तत्रस्वपतंत्रेणप्रलवायो [illegible] पिभवतीतिसपत्नेनपदि हरणीयद्वसनेन· एतेनयदाकुः श्राकाः स्वयंरागादिभान्यार्थंवे निवेदस्यनाम्नः। नवेदयतिवेदोपिवेदार्थस्यकुतोगतिः। नेवाग्निहोत्रंजुहुयात्स्वर्गकामइतिश्रुतौ स्वादे [illegible]

१ विकारइति· भावरूपएवादेशोत्रविकारस्तेनलोपस्यपृथग्गणनंनविरुध्यते· इत्यर्थोर्थइति· गृह्णामीत्याद्यर्थभावश्यकेनानेनैवमस्यास्तिधोतदंशे निपातनानाश्रयणेहेतुरुपन्यासः। ४ ।

कै: विव· ६ कशेषादेकवद्भावाद्यनिर्देशः। ननुशिष्याचार्यसंबंधएवमहान्वेदरक्षाहेतुः किंव्याकरणेनेत्यतआहलोकइति।
नचार्ष्यवचनाद्धनि इत्तिस्त्रेणुभ्रंशा [illegible] शंकयाः विद्यामात्रकारांतरेणावेदरक्षाहेतुत्वंव्याकरणस्योक्तंआव
नचपदवाक्यक्रमादिकृणादव्यापकात्वंसकलस्यापनात्स्यव्याकरणालक्षत्वात। अर्थावगमद्वारापिव्याकर
णस्यवेदरक्षाहेतुत्वमाहवेदार्थंचेतिनिपूर्वाद्धेर्घञ्भावान्नियमाभावेनिकथमित्यतआह अदि त्यहरत्यत्रेति। न
नुयत्रप्रकरणेयल्लिंगायद्विभक्तिकाश्चमंत्राः पठ्यंतेतत्रतथैवतेषांप्रयोगइष्टइतिनोहेनप्रयोजनमित्याशं
काप्रकृतावूहाभावेपिविकृतावूहोपेक्षितइतिदर्शयितुंप्रकृतिविकृतिशब्दार्थमाह यहेति। यस्मिन्नाग्नेयादौयागां
तरेणासौर्यादिनाप्रकृतिविकृत्यवगमोपायस्त्वद्विदेवत्वादिः। अन्यत्रपठितानांमंत्राणांकथमन्यत्रोपगमन
मित्यत्राहप्रकृतिवदिति। एवंमीमांसकाव्यवस्थापयंति। भावनायाः प्राधान्यात्तदाकांक्षयेतरेषांसंबंधात्तदन्वय
सिद्ध्येपश्चात्करणसंबंधाद्भावनायाश्चांगविधावपिविधेयत्वात्प्रकरणादिनाविशेषुंशक्यत्वाद्विकृतिभावनाभि
रंगाणामोपदेशिकत्वेनसंबंधाभावात्करणस्येतिकर्तव्यताकांक्षत्वाद्दैदिकत्वाद्यकरणस्यतद्याविधानामेवांगा कम ६
नामपेक्षितत्वात्तेषामेवप्रकृतौक्लृप्तसामर्थ्यात्तद्विशेषस्यचद्विदेवत्यत्वादिनाशक्यत्वानत्वात्प्रकृतिवद्विकृतिः ॥

=करणसंबंधादिति· सोमेनयजेतनिर्वपेद्ब्रह्मवर्चसकामइतिवाक्यात् [illegible] योगेनब्रह्मवर्चसंभावयेदित्यर्थावबोधेभावनायाः किंकेनकथमितिसंग्रामत्रयसापेक्षत्वात्तनियमाकेनेनितिकरणाकांक्षायामनुष्ठुपानिवृत्तिः किमितिभाव्याकांक्षामाभ्य=
=ब्रह्मवर्चसमनुष्ठानिवृत्तिः कथमितीतिकर्तव्यताकांक्षायामस्तु सानर्थैनिवृत्तायोगांगानामनुपदेशाद्दर्शपूर्णमासविकृतौवैदिकत्वसाम्यायोग्यानांमाहृतांगानामतिदेशइतिसंक्षेपार्थः। कचित्तुनः प्रसक्षवचनेनाप्यतिदेशः। यथा=
=रैष्यकाहणागेसमानामितरच्छ्येनेनेति· क्वचिन्नामधेयेनातिदेशो यथाकुंडपायिनामयनेमासमग्निहोत्रंजुहोतीतिप्रकारान्त्रयमतिदेशविषयेदृष्टं· २

=प्रकृतौ मुख्यार्थत्वेसनीत्यादि॥ येनु प्रकृतावप्यमुख्यार्थास्तेषां प्रकृतिवद्विकृतावपि गुणवादेन सामर्थ्यादनूहः॥ यथाग्नो निरोमरक्कहायन्यामंत्रः॥ इयंगौस्सयाते क्रीणामि तस्यैश्रृतंतस्मै एषिद्रृत्यादि तत्रैकहायनीत्वादस्मिन्न भवेपि श्रृतादीनां का=
=लांतरभावितया गुणवादेन स्तुत्यर्थमुपादानं॥ साधस्के सांडक्रियविकारः सोमक्रयणस्तत्रापि सांप्रत्तं निष्पमाणगविसंभाविताना श्रृतादीनां स्तुत्यर्थमुत्तानसंभवाद विकृतप्रयोगः॥ तथाग्नौ नितिष्ठामे देवताप्रकाशनार्थः सुब्रह्मण्यनिगदइंद्रआगच्छ=
=हरिवभागच्छेत्यादिस्तत्र हरिवशादिशब्दानामिंद्रप्रत्वेपि प्रमाणभावादुपादानं स्तुतिपरत्वादहृष्टानां॥ अग्निष्टुत्याग्नेयीसुब्रह्मण्येति वचनादिंद्रपदस्थाने अग्निपदेपि शेषाहितवत् पदं नोस्त तेऽदृष्टार्थत्वान्नस्य॥ येषांचस्वार्थे प्राधान्येन नोपादानं यथा=
=दर्शपूर्णमासयोः निगदिनिगदे स्रुतमुपहूतामनुष्यायेयज्ञपतिं वर्द्धनिलत्त्रये पञ्चपतिंवर्द्धयेमुस्तऽपहूत इलान्नोपहूवार्थं प्रकृताबुपात्तस्य यज्ञपतिशब्दस्य सत्रेषु यज्ञपतिबहुत्वेप (पाठ) नूहः॥ एवं देवस्यत्वेसत्यसावित्यादीनां कर्मण्यसमवायात् दर्शपूर्णमास गोविंदापयनं ते एतद्विकृतावपि प्रकृतिवत्कर्मवेगाद्विधानस्संभवादनूहः॥ ऽऽ=

कर्त्तव्येति॥ भाष्येचालिंगविभक्तिवचनानां प्रकृत्यादेरूपलक्षणमित्यभिप्रेत्याह प्रकृतीति॥ तत्रोदाहरणमाहतत्रेति॥ किं सर्वाण्य
पि मंत्रपदानि प्रकृतावूहान्यन्यथेत्याशंकायांलिंगादूहेवक्ष्यदाहरणमित्यपेक्षायामाहविस्तरेणेति॥ न्यूरसि धृतामनसे
त्यादीनां स्त्यादिरूपेणोहः॥ साधस्के दष्ट इत्यादिना प्रकृतौ मुख्यार्थत्वे सति दृष्टार्थानां स्वार्थत्वे सति समवेतार्थानामेवो
होनान्येषामिति प्रत्यपादि मीमांसकैरिति भावः॥ भाष्ये वृद्ध्यांतरसंबंधिनो वधातादेः द्वांतरसंबंधलक्षणसंस्कारहेतुत्वा
करणोपयोगाभावेपि मंत्राणामूहे व्याकरणोपयोग इति दर्शयितुं मंत्रा इत्युक्तं॥ प्रकृतौ मंत्राणां करणस्वरूपप्रयुक्त
तयाविकृतौ प्राकृतकरणस्वरूपाभावात्तदप्राप्तानोहेन प्रयोजनमित्याशंक्य प्रकृतौ करणरूपे तेषामनुपयोगाद्दृष्ट
त्वोपयोगात्करणस्वरूपोपलक्षिता पूर्वप्रयुक्तत्वान्मंत्राणां विकृतावपि तस्य भावेन मंत्राणां प्राप्त्यात्तदूहः प्रयोजनमिति
दर्शयितुमत्रशप्य भिष्यक्तं॥ नन्वपूर्वप्रयुक्तत्वे नमंत्राणां विकृतौ प्राप्तावपि नोहः॥ प्रकृतौ समाम्नातार्थवत्त्वाप्य पदस्वरू
पस्य विवक्षितत्वात्तादृशस्यैव वोदकेन प्राप्तत्वाद्धौण्या वृत्त्या वैकृतदेवतादि प्रकाशकत्व संभवादित्याशंक्य प्रकृतावपि
मंत्रपदानां स्वरूपप्रकाशनार्थत्वे ऽदृष्टार्थत्वप्रसंगात्कर्मसमवेतार्थप्रकाशनेन चदृष्टार्थत्व संभवादर्थप्रकाशनोद्दे
शेनैव विहितानां स्वरूपादरेणार्थप्रकाशने निरपेक्षत्वासंभवाद्विकृतेषपदार्थप्राकृतमंत्रपदानां प्रकाशनारम्भका

=यत्तास्वादिरेव पोनवतिस्वादिरं वीर्यकामस्येति प्रमाणद्वयसंबंधादेकस्य नित्यत्वं काम्यत्वं चांगीकृतं तद्वदत्रापि प्रमाणद्वयसद्भावादेकत्वं॰ ६

के॰ वि॰ ७

यभिावान्नन्तस्मर्य शब्दोच्चारणालक्षणाद्युहः संभवतीत्यभिप्रेत्य यथा पथं दृत्क्रकं।। उद्यमान पदानां वेदादेवो दृत्त्वप्रयोगो भ
विष्यतिकिं व्याकरणेनेत्यत उक्तं ताञ्चावेद्याकरणादिति।। प्रत्यक्षकृतिमूलमपि स्मृतिं प्रमाणां धर्मा विगमे इव व्याकरणमप्यूह
र्थवदिति भावः॥ नन्वागमः खल्वपीत्यत्र निराकांक्षाय प्रयोजनमित्यनुषंजनीयं न च तदुपपद्यते आगमस्य व्याकरणाध्य
यनफलत्वाभावादित्यत आह॥ आगमः प्रयोजक इति।। स कृतप्रयुक्तस्य प्रयोजनशब्दस्योभयपरत्वे प्रयोजनमिति यथा निर्दे
शउपपद्यते नत्वेकं शाका॥ ननु कार्यमिति अनुष्ठाप्यते नेति कस्यस्या कारणं प्रयोजनमुच्यते तथा च निःप्रयोजन इत्यक्रोप्र
=धर्मदसनेन॰ योजनाभिधानं व्याहतमित्यत आह इत्यका मतापि हि।। एकस्य द्व्यर्थत्वे संयोगपृथक्त्वमित्यनेन एकस्य नित्यत्वकाम्य
त्वेन विरुद्धे इति फलाभिधानं युक्तमित्यभिप्रायः॥ न हि तत्त्वेप्यद्वयमुपात्तं इति तद्वत्फलद्वयं फलमप्यस्येवेत्यत आह दृष्ट
मिति॥ नन्वागम इति वेदस्यानेन वाच्य मागमः॥ पौरुषेयत्वाद्वेदमूलतया स्मृतेरप्यागमत्वमिति चेन्न॥ नित्यानित्यसं
योगविरोधात् स्मृतेर्हि वेदमूलतया स्मृतिविधेयत्वे व्याकरणाध्ययनस्य वेदविधेयत्वमभ्युपगन्तव्यं न यतद्वक्तव्यतया रुघ ७
रुपे यतया॥ नित्यस्य व्याकरणस्याध्ययनं नित्येन वेदेन विधीयत इत्ययोगात् स्मृतेः का गतिरिति चेत्।। अपस्मृतिरस्तु
युक्तं चैतत्॥ अंगत्वं हि व्याकरणस्य स्मर्यते॥ तद्वद्विधा भवतीता दृष्यन्ति ह्यवयवत्वाद्धा॥ नाधः॥ अरत्नादीनां तादृष्यविरुद्धा॥

७

=मुख्यारीनामुदाहरणानि-व्रीहिभिर्यजेतेत्यत्र तृतीयाश्रुत्या व्रीहीणां यागांगत्वं॰१ बर्हिर्देवसदनं दामीत्यत्र लवनप्रकाशनरूपात्सामर्थ्यान्मंत्रस्य लवनांगत्वं॰२ यस्य पर्णमयी जुहूर्भवतीत्यत्र पर्णताजुह्वोः समभिव्याहारात् पर्णतायाः जुह्वं=
=गत्वं॰ प्रयाजादिषु समिधो यजतीत्यत्र विशेषानिर्देशात्फलाकांक्षायां दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र च साधनाकांक्षायां प्रकरणात्प्रयाजानां दर्शपूर्णमासांगत्वं॰४ ऐंद्राग्नमेकादशकपालं निर्वपेदित्यानं दाशकपा=
=लमिति वंक्रमाद्विहिथिं शुन्धी रोचनादियाज्यानुवाक्यानां यथासंख्यं विनियोगः॰५ होतुश्चमसभक्षणं हौत्रंच समाख्यया॰६ =

नोऽप्रमाणानामभावात्।तद्वितीयः॥ ज्ञानित्यस्यानित्यावयवत्वायोगात्।अथ श्रुतिमूलतयास्याः नित्वमस्यापेक्ष्यते तद्दि
श्रुत्यादिषट्कमंगशब्देनोच्यते।संभवति हि तेषां श्रुत्यवयवत्वं षाह्यात्मकत्वात्।तथाहि निरपेक्षोरवः श्रुतिः। अभिधानसम
र्था हि मंत्रलिंगं। अंगांगिसंबंधसमर्पकपदसमूहो वाक्यं।सापेक्ष वाक्यार्थप्रतिपादकवाक्यसमूहः प्रकरणं।संनिधि
परिपठितानां वाक्यानां स्थानत्वं।यौगिकः शब्दः समाख्येति।न चास्मिन्पक्षेऽवेद इत्येव सिद्धत्वात् प्रसंग इत्यस्यावैयर्थ्य
हेतुरूपफलत्वाच्चेतच्चत्वाभिधानेनार्थवत्त्वात्तत्र श्रुतेर्विनियोजकत्वे हेतुः मुख्यं गौणं वा सामर्थ्यं तेन विनि
योजकत्वात्तद्रूपं च विनियोगकारकं प्रवरणं।स्वार्थलक्षिता पूर्वसाधनांशे विनियोगः फलं सामान्यसंबंधो हि लिं
गस्य विनियोजकत्वे हेतुः सामर्थ्यरूपं तु अनेकार्थेनाह्वाकस्य विनियोगः फलं समभिव्याहारान्यथानुपपत्ति
र्वाक्यस्य विनियोगः फलं।विनियोजकत्वे प्रकरणस्य विनियोज्यस्य फलसंबंधाभावो हेतुः।साकांक्ष फलवत्त्वं नि
धानं रूपं फलं तु फलवति विनियोगः।क्रमस्य सादेश्यं विनियोगः फलं।सा वाच्यप्राप्तिः समाख्याया विनियोजक
त्वे हेतुः।यौगिकशब्दत्वरूपं प्रतियोगिनि विनियोगः फलं।तस्माद्व्याकरणाध्ययनस्य प्रयोजनमिदं न शब्दानुशा
सनस्याध्ययनं आगमाविव अर्थज्ञानं विनाप्युपपत्तेः।शब्दानुशासनं तु न व्याकरणार्थज्ञानं विना संभवति।अत एतद्भि

×व्याकरणस्यांगत्वबोधकमिदं किंतु श्रुत्यादेः।अ पि व॰×२

×विनियोजकत्वे हेतुः।अंगांगिसंबंधसमर्पकपदसमभिव्याहारो रूपं॰ शेषशेषिभावे वाक्यस्य ×४× जकत्वे हेतुः।सन्निधिपठितानि वाक्यानि रूपं॰ अन्यतराकांक्षायां प्रकरण

एकतत्वविनियो ×

निसा२

के वि ८ धानं प्रयोजनाभिधानप्रतिज्ञया न संगच्छते॥ अत्रोच्यते॥ आप्तमतत्वमस्याबाधितासंदिग्धार्थप्रतिपादकवाक्यत्वात् श्रुतिमूलत्वाच्चेति
ब्रूमः॥ यत्तु नित्यसंयोगविरोधप्रसंगात् व्याकरणाध्ययनस्य विधेयत्वायोगात् कथं तद्विधायकस्य स्मृतिवाक्यस्य श्रुतिमूलत्वमिति तत्र
न ब्रूमः॥ व्याकरणस्य प्रवाहनित्यत्वान्नित्यविधिविषयत्वं न विरोत्स्यत इति। अथोच्येत। प्रत्यक्षश्रुतिविषयत्वे सति तदन्यथा
४ नुपपत्त्या प्रवाहनित्यत्वं कल्प्येत तदभावे त्वपस्मृतित्वेनाप्युपपन्नेर्न कल्पनागौरवाश्रयणं युक्तं इति॥ नन्वस्त्येषा व्याकृता
वागुद्यत इति प्रत्यक्षश्रुतिमूलत्वस्यापि भावात् न चैषा संप्रदायव्याकृतनित्यवेदाभिप्रायात् तथा सति वागुद्यत इत्येतावता
चरितार्थत्वाद्व्याकृतेति व्यर्थं स्यात्॥ न च वेदाविरोधेन तन्मूलत्वे सत्यपि स्मृतित्वं युक्तमाश्रयितुं॥ यत्तु तादृश्यविषयत्वाभावा
दंगत्वं न संभवतीति तदयुक्तं॥ अंगत्वेन संस्तवान् मुखं व्याकरणं प्रोक्तमिति॥ परंतु तदर्थावगमद्वारा वेदोपकारकत्वादंगत्व
संभवात् श्रुत्या विधिप्रायत्वेन वेदोध्येतव्यो ज्ञेयश्चेत्येव सिद्धत्वात् षडंग इति व्यर्थं स्यात्॥ यत्त्वध्ययनस्येदं प्रयोजनं न शब्दानुशा
सनस्येति॥ तन्न रक्षोहेत्यध्येतिवचनाच्छब्दानुशासनं प्रत्यपि प्रयोजनसंभवात् वचनिक्कारणाशब्देनाध्ययनमात्रपर्यवसानमुक्त कृष्ण.
तेभित्यकर्मतायाः प्रतिपादनपरत्वात् तस्यैवैतत्फलत्वात् भाष्ये च फलवान्नित्यत्व फलशब्देन वा कार्यावगमो विवक्षितः॥ अवश्य ८
मित्यनेन विवक्षितं दर्शयति॥ अध्यापनमिति॥ लाघवं वक्ष्यति पदपाठापेक्षया प्रकृत्यादिविभागेनान्वाख्यानस्य विवक्षि

तं नञः संदेहशब्देन अभावे वर्तमानस्य समासे सति असंदेहशब्देन संदेहाभावोऽभिधीयत इत्यभिप्रेत्य कोऽसावर्तावोऽभिप्रेत इत्यपेक्षायामा
ह संदेहस्येति। ननु चासंदेहशब्दस्यार्थशब्देन बहुव्रीहिर्वास्याच्चतुर्थीतत्पुरुषो वा आद्येऽर्थशब्दस्य प्रयोजनवचनत्वं वक्तव्यं तत्र बुद्धिवि
संदेहस्याप्रहस्यावेति। आद्ये अभावनिहते भवितव्यात्संदेहप्रागभावनिवृत्तिः संदेहः प्रयोजनमित्यफलं स्यात्॥ तत्र वा न यदि व्याकरणाप
पद्येत। द्वितीयेऽपि वस्तुतः प्राप्तस्य ज्ञानतो प्राप्तस्य आप्यावा। वस्तुनोऽप्राप्तस्य प्राप्त्या वा नाद्यः। न ह्यज्ञानतो प्राप्तस्य संदेहप्रा
गभावस्य ज्ञानेनाज्ञातनिवृत्त्याप्राप्तिः प्रयोजनं अज्ञायमानस्यापि सत्त्वमात्रेण प्रयोजनत्वात्। चरमेऽपि प्रागभावस्य प्राप्ति
रूपस्याभावस्यात्सुखादिवत्तास न एव वासंयोगा दिनायाम्नादिवत्। नाद्यः। अनादित्वात्। न द्वितीयः। प्रागभावस्य प्रतियोगि
समानदेशतया आत्मदेशत्वेन नित्यप्राप्तत्वात् चतुर्थी तत्पुरुषपक्षेऽपि अर्थशब्दस्य तादर्थ्यवचनत्वाद्व्याकरणस्य तदुत्पादनेन
वा तत्ज्ञापनेन वा तादर्थ्यं नाद्यः अनादित्वादेव। न द्वितीयः। शब्दस्वरूपज्ञापकस्य संदेहप्रागभावाज्ञापकत्वात्। अतः
प्रध्वंस एव वक्तुमुचित इत्यत आह। ननु प्रध्वंसेति तत्र हेतुमाह। नहीति। अत एव संदेहनिवृत्तेः व्याख्यात्परं परमेव सिद्ध
त्वाद्व्याकरणेन प्रयोजनमित्यनुपालंभः॥ ननु वेदार्थज्ञानेन निश्चयरूपेणाभाव्यं तद्यदि सत्यपि संदेहे तन्निवृत्त्या व्या
ख्यातपरं परयावास्यात्। व्याकरणेन वासंदेहं विनैव वा को न्वत्र विशेषः। किंच व्याकरणादिव शेनार्थानिश्चयः। तावादि

=अत एवेति। वैयाकरणस्य संदेहानुसाराद्देवर्व्याख्यातॄणां तु सर्वदा सन्निधानाभावात् प्रतिपदं ज्ञायमानसंशयानां ~~[struck out]~~ निराकर्तुमशक्यत्वात्॥ २=

कै॰ वि॰
५

शब्दानां गमनादिकर्तृमात्रे च व्याख्यानात् गमनादिकर्तृपुरुषादिरपि गवाद्यर्थः स्यात्। अत्रोच्यते॥ नहि प्रतिपुरुषं प्रतिक्षणं
वजायमानानां संशयानामस्मात् अभिनिरसितुं शक्यन्ते। बहुलत्वात्तेषां। सर्वदा सन्निधानाभावाच्च॥ न च स्वं निश्चितोर्थेन वि
स्मर्यते। अत एव मीमांसारम्भो पार्थवान्। अन्यथा कल्पसूत्रादिभिरेव गतत्वात् किं मीमांसया। अपि यत्तु पुरुषादिरपि गवाद्यर्थः
स्यादिति। तत्र ब्रूमः। नहि व्याकरणमर्थानुशासनं किंतु तत्तदर्थविशेषोपादानेन शब्दानुशासनं॥ तत्र देवताधिकरणान्या
येनासति प्रमाणान्तरविरोधे व्युत्पत्त्यर्थमुपादीयमानोर्थ आश्रयिष्यते। सति तु प्रमाणान्तरविरोधे व्युत्पत्त्यर्थ एव तदि
ति न कश्चिद्विरोधः। न च प्रागभावस्य प्रयोजनत्वासंभवः तस्य स्वरूपेणासाध्यत्वेपि तत्परिपालनस्य साध्यत्वात्। तत्प्र
तिपालनं च प्रतियोगिजनककारणादिध्वंसनं। प्रागभावस्य प्रतियोगिजनकत्वनियमात् तदभावे स्वतो भावप्रसंगाद्धन्य
नादित्वसाम्येनात्यन्ताभावो विवक्षितः। पदार्थविषयसंदेहाभावश्च प्रयोजनत्वेन विवक्षितो न वाक्यार्थविषयः॥ पदा
नामेवानुशासनात्। कस्तर्हि निर्णय इत्यत आह पूर्वपदेति। अर्थविशेषाश्रयबहुव्रीहिनिबंधनपूर्वपदप्रकृतिस्वरस्य त ग॰ स॰
नाविनाभावादर्थनिर्णायकत्वं युक्तमितिभावः। नन्वेवं बहुव्रीहीनां बहुतरत्वाद्बहूनामनुग्रहो न्याय्य इति पृथगमतो भि ५
धानं न्याय्यमित्यत्राह मुख्यानीति। प्रधानत्वादेव तेषां प्रथमतोभिधानं इतरेषां गौणत्वात् पश्चादभिधानमिति भावः॥ व्य

×तेषां प्रधानत्वं च पदपदार्थज्ञानविषयत्वेनान्तरंगत्वात् वक्ष्यमाणानां च बहिरंगशब्दापशब्दप्रयोगविषयत्वादानुषंगिकत्वं बोध्यं.१×

=कर्मांगे पदार्थ निषेधे फलश्रुतेरर्थवादत्वाद्यथाय स्यवै पर्णं जुहूर्भवति न स पापं श्लोकं शृणोति साक्षात्पापश्लोकश्रवणस्यैनिंदामात्रपरत्वादस्य निंदार्थवादत्वमिति भावः। शेषः सत्रिसत्रन्यायेनार्थवादिकं पराभवाभावादरेवेर=

=फलं स्यादिति पराशंसा सात्त्विसत्राणामनुष्ठाने तत्फलप्रसङ्गात्तत्रार्थवादिकफलकल्पनेपि क्रतुशेषापभाषणे फलश्रुतेः फलाभावआर्थवादिकत्वादपि तु पर्णताया विधिप्रधानफलेनैव फलवत्त्वमपभाषणनिषेधस्यापि कौन्तुमकारणमतं विवरणमन्यते=

=तुपापसाधनत्वार्थकम्लेच्छपदेन म्लेच्छोर्थवसत्र्यसेनापभाषणस्य पापफलं यद्याधिकं वैनतज्जन्यफलविकल्पफलजनकमिति न्यायादन्यपभाषणवानेष्यव्याकरणस्य तु फलं पापाभावः पुण्यं वेतिवार्ध्यं वस्तुतस्तु नेह नाक्तिसत्रन्यायः तथाहि आपुन्नोतिरिसा=

मा=२

१र्त्येकवचनमनुपपन्नं। प्रयोजनानीत्यनेन बहुवचनांतेन समानाधिकृतत्वादित्यत आह तु न्वितिति। अव्ययमेतत्पञ्चम्यः शब्द इति भावः। नन्वम्लेच्छत्वेपि अनपभाषणाफलेसत्यम्लेच्छत्वं व्याकरणप्रयोजनं स्यात्। अपशब्दवर्जनस्य व्याकरणाधीनत्वा न्न त्वेवं पराबभूवुः तस्माद्ब्राह्मणेनन म्लेच्छितवाइत्यत्र पराभवस्यापशब्दभाषणफलत्वावगमात्तस्मात्पराभूतानिमेत्यपभ्रं यं व्याकरणमिति वक्तव्यमित्याह निंदार्थवादेति। अयमाशयः पराभवाख्यानस्यापभाषणफलप्रदर्शनार्थत्वे म्लेच्छो हवाएष यदपशब्द इत्यस्यानर्थक्यापत्तिः। नच म्लेच्छस्वरूपप्रदर्शनार्थतदितिवाच्यं नापभाषितवाइत्यनेनैवतस्य प्रदर्शनादतो म्लेच्छोहवाएषयदपशब्द इति फलप्रदर्शनपरमपशब्दप्रयोगेम्लेच्छत्वस्यापि साक्षात्त्वान्न त्वयोर्गुःपापं भवति ति तत्फलप्रदर्शनमुखेन तेन तेसुरा इत्यादिरर्थवादः। अतोव्याकरणस्यम्लेच्छाः पापिनोमाभूमेत्यम्लेच्छत्वरूपप्रयोजना भिधानं युक्तमिति। कृत्यार्थे तवैन्प्रत्ययविधानादर्हस्यापि कृत्यार्थत्वात्तस्य नञा प्रतिषेधेपि रागप्राप्तम्लेच्छनं कर्तव्यं ता न निषिद्धा इत्याशंकायन्निंघतेतन्निषिध्यत इत्यनेनन्यायेनाक्रतोपि नञ्सहितो विधिप्रत्ययो ध्याहार्यो निषेधाय किंतु श्रूयमाणस्य विधिप्रत्ययस्य निषेधापकत्वेवक्तव्यं न्यायस्येत्यभिप्रेत्य निंदार्थवादेनेति तत्तीयाप्रयोगः॥ किमत्रा न्वितमित्यत आह॥ तत्रेति। प्रकृतीति। प्रकृतप्रयद्याइत्यनेन मतांतरमाह॥ पदेति। सर्वस्येत्यत्र पदग्रहणस्य योदितत्वा दितिभावः॥ नन्वनेन वैदिकशब्देत्रेशनं निषिध्यते न म्लेच्छभाषाविप्रयोर्यनिषेध इत्यत आह नम्लेच्छितवाइत्यस्ये

=सर्वः श्रुतः सारसमनिषतावि नाम्याकर्तव्यइतिमाप्यविरोधः प्रवर्ममते कश्चोनदुक्तिः।२ =मतांतरपरिकारेपिनेदंद्वितं किं तेवैधिकः पुनः प्रयोगोतआह-नत्वं वेति।२= ..... तत्त्वमावोपाय्यामिति ते पक्षकल्पेयेतिमीमांसादि।५=

=मिथ्याप्रयुक्तादिति॰ हेतुगर्भविशेषणं॰ यतो मिथ्याप्रयुक्तो तो यदर्थप्रतिपादयत्यप्रयुक्तस्तत्समर्थं नाहेति भाष्यार्थः॥ मिथ्याप्रयुक्तश्चासस्य च स्वरवर्णदोषवैशिष्ट्येन प्रयुक्त इत्यर्थः॥ तमाचष्टे॰ स्वरवर्णदोषा[redacted]त्प्रतिपादयन्निति॰ मिथ्याप्रयुक्तत्व

[redacted]

कै॰ वि॰ तिः॥ अयं भावः॥ अर्थवादरूपमाना पभाषणेन पराभवस्योक्तत्वान्नतावद्वैदिकशब्दमात्रम्लेच्छनविषयो निषेधः॥ अप

१० भाषणस्य व्याकरणानुगतस्य शब्दापभ्रंशरूपत्वप्रसिद्धत्वान्न म्लेच्छभाषा विषयो पि तद्विषयस्य प्रतिषेधोन्य एवन म्ले

10 च्छभाषांशिक्षेतेति॥ म्लेच्छो नाम वेदबाह्यः पुरुषविशेषः स कथमपशब्द इत्यत आह घञिति॥ कर्मणि करणे वेति भाव

॥ असर्वनामत्वात्स्वरत इति तसिल त्रुपपन्न इत्यत आह स्वरत इति॥ तच्छब्दापेक्षितं यच्छब्दार्थमाह यदिति॥ द्वंद्वे वा ग्रहण इ

ति निर्देशोनुपपन्नो बहुव्रीहौ तु प्रकृतदुष्टपरामर्शिना स इत्यनेन सामानाधिकरण्यमनुपपन्नमित्यत आह॥ वा वेति॥

कथमन्यत्स्यादित्याशंक्यगौणोयं प्रयोग इत्यभिप्रेत्याह हिंसकेति॥ उदाहरणमनुपपन्नं इंद्रशत्रुशब्दस्यार्थपदार्थ

=फलस्यापि हेतुत्वात्॰ ५= कत्वइत्यत आह यथेति॥ इंद्रेणाहेतुनात्व ष्ट्रा हुतइत्यर्थः॥ मंत्र ऊहितः॥ मंत्रे इंद्रशत्रुशब्द ऊहित इत्यर्थः॥ अथवा मंत्रो बो

धक इत्यर्थः॥ शत्रुशब्दस्यामित्रपर्यायत्वे बहुव्रीहितत्पुरुषयोर विशेष इत्यत्राह॥ तत्रेंद्रस्येति॥ आमंत्रणविभक्तिः क

स्मान्न भवतीत्यत आह इंद्रशत्रुत्वस्येति॥ सिद्धस्य हि कार्यांतरविधानाय संबोधनसंभव इति भावः॥ नन्वत्र यज्ञकर्म कृष्ण

णीत्येक श्रुतिः कस्मान्न भवतीत्यत आह ऊह्यमानस्येति॥ मेदलक्षणे विंतितं तु ह्यमानस्य मंत्रत्वमुक्तं न॥ किंता वदध्या मं १०

मंत्रैकवाक्यत्वेन मंत्रमध्ये निवेशान्मंत्रत्वमिति जाग्रे भिहितं अनाम्नातेष्वमंत्रत्वमिति तिन मंत्रैकवाक्यतामंत्रत्व कारणादिं

=इति तमसमंत्रत्वाभावाद्यदह॰ मंत्रेष्वित्यादि॰ ५=

=निरुक्तस्यादीनि॰ अयं भावः॥ संबोधनं ज्ञानजनको व्यापार इच्छा विशेषरूपस्तत्र ज्ञानस्य ... तत्स्यार्थस्यात्तानि सिद्धं तज्ज्ञानं॰ राजत्वस्यासिद्धत्वेन संबोधनपराभिति ना॰

त्यभियुक्तप्रसिद्धिः। प्राक्स्वाध्यायकालपठितेष्वेव। नचोह्यमानानि पदानि स्वाध्यायकाले मंत्रगततया पठितानि
तस्मादमंत्रत्वमिति। अत एव मंत्रो हीन इति शिक्षाकारपाठेपि प्रसिद्धमंत्रपरिग्रहेण ह्यमानस्यामंत्रा र्थत्वे
इंद्रशत्रुरित्युदाहरणमसंगतं स्यादिति मंत्रशब्दो योगिकत्वेन बोधकत्वाच्छन्देष्वपि मंत्रो हीन इति यदुष्टत्वमभिधेन
मित्यभिप्रेत्य दुष्टः शब्द इत्यत्र कं भाष्यकृता। तथापि मंत्राणामेकश्रुतिरित्यत्र पक्षः स्यात्कस्मादेकश्रुतिर्नेत्यत आ
हजपादीति। नन्वधीतमपि निस्वोच्चारणमुच्यते विज्ञानं च तादृशं अत आह तं यदधीतमविज्ञातमित्यत आहाविदि
तेति। स्रुवादिसंस्कारवेदमंत्राणामनुष्ठानउपपद्यते अनुष्ठानसाध्यं च फलमित्यत आह इति प्रयोजनमपिनि। अनेनका =तदकरणे प्रत्यवा=
म्यत्वं व्याकरणाध्ययनस्य प्रदर्शितमित्याह। अनेनेति। ननु नानेन व्याकरणस्याभ्युदयहेतुत्वमुच्यते तथा न वग =यमुक्तेत्यादिः।
मात्। ज्ञापयेत। वा वोः प्रकृतिप्रत्यययोर्यथायोग्यं संबंधं वेत्तीति वाग्योगविदिति वैयाकरण उच्यते। तत्समभि
व्याहाराद्वास्य वाकरस्य व्याकरणानुगतशब्दप्रयोगविषयता गम्यत इति भवत्येन व्याकरणस्याभ्युदयहेतुत्वप्र
दर्शनपरमिति तन्न यतो वाग्योगविदि। यद्वा वाचो वचनस्य योगं प्रहार्थान्वयविशेषरूपं व्यक्तिं वेत्तीति ब्राह्मणा
वाचे ग्रंथे पुवचवाचो भाषणस्य प्रकाशनस्य योगं योगपमर्थं वेत्तीति वाग्योगविदिति मीमांसक उच्यते। सगुरु

×शास्त्रप न्किति॰ कुशलो॰ऽधीतव्याकरणोऽप्रमादी विशेषे॰ऽर्थविशेषेऽव्यवहारवेलायां यथावत् अंबूकृतादिदोषविकलात्राक्षान्तुञ्चारयति वाग्योविमर्शस्नेनः॰ नोकेजयमुत्कर्षमित्यर्थः ×

कै॰वि॰ ११

संप्रदायागतस्वरादिविशेषकुशलः सन्वेदाध्ययनादिव्यवहारकाले वैदिकशब्दान्प्रयुंजानः परत्र जयं प्राप्नोतीति त
स्मादप्युक्तमेतदित्याशंक्य तात्पर्यमाह स एवेति। अयमाशयः। कृतेनोपपत्तौ वाकृता कल्पनाऽयोगादप्रसिद्ध
संभवे वाप्रसिद्धस्वीकारयोगान्मीमांसकाद्यभिधानं पेक्ष्य योगशब्दवाच्यसंबंधोपपादनाया कृतार्थकल्पना
प्रसंगाद्योगशब्देन योग्यार्थाभिधाने प्रसिद्धस्वीकाराप्रपत्तेर्वैयाकरणाभिधाने चैतदुभयाभावाद्योगविदि
ति वैयाकरणाः शब्दानि तिव वैदिकशब्दानितिव्याख्याने विना प्रकरणादिना शब्दस्य संकोचापत्तिः। यथावदि
ति व्यर्थं। पदांतरेणाप्यप्रकृतार्थाविरोधेनेति दर्शयितुमर्थवत्। तथा चायमर्थः। यो वैयाकरणोऽस्मा यथार्थ
प्रतिपादनकाले प्रमादादिनाप्ययुक्तमप्यस्वरितमित्यस्य इति प्रयोक्तव्ये कुशलः सन्प्रकरणाद्यविरोधेना
दश्या ८ नर्थत्वादिविशेषं प्रयुंजीत स परलोके नेतं फलं प्राप्नोतीति साधुरिति। ननु किमिदं साधुत्वं जातिरूपं वा सामा
न्यमुपाधिरूपं वा। आद्ये किं शब्दत्वमेव साधुत्वं उत तद्व्याप्तं सामान्यं वा। अस्य शब्दो जातिनिमित्तोपि नासाधुः कृष्ण
स्यात्तस्यापि शब्दत्वात्। द्वितीये तस्य शब्दत्वव्याप्यं जातिरिक्तं व्यंजकं वक्तव्यं न च तन्निरूप्यते। तस्माज्जातिरूपं सा ११
मान्यं न संभवति। उपाधिरूपमपि सामान्यं किं प्रत्यायकत्वमात्रं। किंवा शब्दत्वे सत्यर्थप्रत्यायकत्वमाहोस्वि

आधेर

दर्थविषयानादिप्रयोगत्वं वा स्वाभाविकार्थपरत्वं वा लक्षणानुगतशब्दत्वं वा ॥ नाद्यः ॥ गाव्यादिष्वतिव्याप्तेः ॥ नापि द्विती-
यः ॥ तत्र घटार्थशब्दस्याभिधेयवाचित्वेन गोणीगोशब्दयोरस्मिन्माणवकाभिप्रायेण प्रयुक्तयोः साधुत्वं स्यादनयोरप्यर्था-
न्तरे साधुत्वात्तदिहापि साधुत्वमिति चेत् ॥ गोणीशब्दस्यावपने साधुत्वात्सास्नादिमति साधुत्वापत्तिः ॥ शक्त्यार्थप्रत्या-
यकत्वं साधुत्वमभिमतमिति चेत्तथापि गाव्यादिष्वतिव्याप्तिः ॥ एकपदिशब्दानां च पुत्रभार्यादिवाचिनां पुत्राद्यनभिधा
यत्वे शिष्टभार्याद्यभिधानाशङ्केः पुत्राद्यो शक्तिसद्भावात्साधुत्वापत्तिः ॥ नापि तृतीयः ॥ गाव्यादिशब्दानामपि सास्नादिम-
दर्थविषयप्रयोगत्वं व्यस्मरणेनानादित्वावगमात्साधुत्वप्रसंगात् ॥ नापि चतुर्थः ॥ तत एव ॥ नापि पञ्चमः ॥ वचनत्वादीनाम-
पि लक्षणानुगतानां साधुत्वप्रसंगात्तस्मात्साधुत्वं नाम न किंचित्स्वरूपतो निरूप्यते नापि प्रमाणं पश्यामः ॥ तथाहि
प्रत्यक्षं तावच्छब्दमात्रग्रहणात्तिन नकृत्ते साधुत्वासाधुत्वे न चानुमीयते अनवच्छिन्नसंबन्धत्वात्तत्र स्यापि विषयत्वाद्युपमानम-
पि न प्रक्रमते ऽर्थप्रत्यायकत्वान्यथानुपपत्तिरपि न साधुत्वग्राहिकार्थप्रत्यायकत्वस्य गाव्यादिष्वपि भावात् ॥ प्रमा-
भावा॰ णांतरमूलत्वात्पौरुषेयवचनमपि न संभवति ॥ नापि वैदिकं वचः ॥ तस्य विधिनिषेधनिरपेक्षे सिद्धवस्तुनि प्रामा-
ण्यासंभवात् ॥ अभावस्तु न भावगोचरः ॥ तस्माल्लक्षणप्रमाणयोरभावात्साधुत्वं नाम किंचित्तत्त्वं नेति आशङ्क्याभि-
धीयते ॥ वाचकत्वविलक्षणा हि गोशब्दादीनामन्यतमस्य स्वार्थप्रत्यायनांगत्वं साधुत्वं ॥ न च गाव्यादिशब्देष्वतिव्याप्तिः ॥

=एतेनानुपलब्ध्याख्यप्रमाणाभावनिरस्तं॰२=

वै·वि· १२ गौणलाक्षणिकयोरन्यतरेणार्थप्रत्यायकत्वस्य पुरस्कार्यत्वे तस्याभावेनाभावात्प्रापकत्वस्य वाच्येन निराकरिष्यमाणत्वा
द्द्वयं त्वपदिष्टस्यार्थप्रत्यायनांगत्वात् यद्यप्यर्थप्रत्यायनांगत्वे सत्यनपभ्रंशत्वं साधुत्वं तत्र च प्रकृतिप्रत्ययान्वाख्यानस्मृति
सहितं प्रत्यक्षं प्रमाणमुपदेशसहकृतं श्रोत्रमिव वक्ष्यावगमे यथा चोदात्तत्वादौ श्रोत्रं स्मृतिसापेक्षमेकत्र च प्रकृति
प्रत्ययान्वाख्यानस्मृतिसहकृतप्रत्यक्षेण साधुत्वे गृहीते तदन्यत्र कालप्रवृत्तलक्षणागतप्रकृतिप्रत्ययलोपादिनान्वाख्या
यमाने साधुत्वे अर्थप्रत्यायकत्वे सति लक्षणानुगतत्वेनानुगतसाधुत्वमेव दृष्टान्तीकृत्यानुमातुं शक्यत इत्यनुमा
नमपि साधुत्वे संभवति। स्थिते च प्रत्यक्षादित्र्यात्वे साधुत्वस्य प्रमाणान्तरमूलं पौरुषेयं वचोऽर्थप्रत्यायनांगत्वे सति
व्याकरणानुगतानां साधवः इत्येवंरूपं संभवति। वैदिकमपि वचः साधुत्वासाधुत्वविषयं विधिनिषेधव्यतिरेकेणापि सत्यं
ज्ञानमित्यादिषि द्वयस्यापि विपर्ययमिव संभवति शास्त्रस्य विधिनिषेधात्मनियमेऽपि तद्विषयतया साधुत्वासाधुत्वप्रतिपाद
नपरत्वे संभवति॥ एवं प्रमाणान्तरविषयत्वमपि यथासंभवं योजनीयं तस्मादस्ति साधुत्वं नाम किंचिदिति स्थितं। कुस· १२
प्रश्नाभिप्रायमाह॥ वागिति। कृतत्वादिति॥ शब्देनावगतत्वादित्यर्थः॥ दोषेति॥ शास्त्रस्याधर्महेतुत्वं दोषः नात्र दोष
दर्शनं वाग्योगविदो प्रदायहरणं नाभिप्रेतं तन्निरासेनावाग्योगविद्गुहरणे न किं तर्हि कृतत्वद्वाग्योगविदस्त्राहस्तया
चानर्थहेतुत्वं व्याकरणस्य दर्शयितुं लोकाभ्युदयहेतुत्वे निरस्य दितितदनभिधानाय प्रश्नाभिप्रायस्यैव विवियमाण

× चकारेणैकवचनयाभिरोभयोः प्रतिपादनाद्वेलपिबोध्यं × २
समुच्चय

=साधुशब्दस्य यथा धर्मं धर्मजनकतोक्ता शास्त्रेण तथा साधुशब्दज्ञानस्यापि धर्मजनकतेति भावः॥ ४ =

त्वाद्वाग्योगविदेवेति न सिद्ध्यतीति नो मतमग्रंथ इत्यभिप्रेत्याह प्रष्टैवेति। अवाग्योगविदिति परमतं क इति भाष्यस्यायमर्थ
ः पृच्छतीत्यत्र वाग्योगवित्कर्तृकत्वविपरीत इति किं याज्ञार्थः। अप्रैव संनिधानाद्वाग्योगविदेव प्रष्ट इत्यभिप्रेत्याह वाग्योगिति। सि
द्धांती संनिधानात्सामर्थ्यं बलवदित्यभिप्रेत्याह दृष्टेति। बलवदिति सामर्थ्यमपि प्रत्यक्ष एवेत्यभिप्रेत्याह यथाहीति। एवमपश
ब्दज्ञान इत्यनुपपन्नमिव तत्र प्रमाणाभावादित्यत आह यथा चेति। यद्यद्विरोधि तज्ञद्विरोधिफलकं यथा ज्ञेप्रिकद्द्व्यसेवात
यथापशब्दज्ञानमित्यनुमानमेव प्रमाणमिति भावः॥ अतिव्याप्तिकोऽनुपपन्नो भाष्ये तद्विशेषसमानगुणस्य वोदितत्वाद
दृत्वात्प्रत्यवायोऽत्र तदनावदित्यत आह न्यायास इति। क्रियत इत्यज्ञानस्याधर्महेतुत्वं हस्तां तेनाह। तथावेति। अज्ञानतो भाष्ये लंतायेसमंत
प्रतिषिद्धानुष्ठानं तत्र प्रत्यवायस्तित्त्वज्ञानमपि स्यादित्यत आह। पुरुषेति। पुरुषग्रहणं मनुष्योपलक्षणं अयं भावः। मित्यर्थः पं ६
अधिकारी ह्यतिषिलक्षणो हि मनुष्याधिकारत्वं शास्त्रस्य स्थापितं। अतस्तिरश्चां विधिप्रतिषेधयोरनधिकारात्प्रतिषि
द्धानुष्ठानमेवलेषां तत्र भवतीति प्रत्यवायाभाव इति। ननु तथापि विद्विषो धिकारादविद्विषः प्रतिषिद्धानुष्ठानेपि न प्रत्यवा
य इत्यत आह। तत्परीति। यो हि सद्विषयज्ञाने योग्यः सतं विषयं प्रतिषिद्धमजानन्ननुतिष्ठन्प्रत्यवैतीति भावः। संनिधा
नाद्वाग्योगविदेव ग्राह्य इत्युक्तं वाक्यमवाग्योगविदिति कथमित्यत आह। प्रकरणादिति। सतीति। विरत्र प्रकरणशब्देन विव
क्षितः संनिधेः सामर्थ्यानिरूप्येवान्वयहेतुत्वात्तदभावे प्रयोजकत्वमिति भावः। ज्ञानं तस्य शरणमिति कथमपशब्दज्ञानात्प्र

=धर्महेतुत्वस्य शब्दज्ञानपूर्वकप्रयोगे सत्वाज्ज्ञानमात्रे॰ भाषा दृ॰२=

×विप्रतिपन्नत्वेन विप्रतिपत्त्याश्रयत्वेन॰ अयं भावः। सर्वमेवेतावद्विज्ञानं निर्णीतार्थप्रकाशकत्वात्प्रमाणमेव न स्वतस्तु कारणदोषप्रमाणं न रविसंवादात्मप्रामाण्यापवादः॰ तदुक्तं॰ तस्माद्बोधात्म×

×कत्वेन प्राप्ता बुद्धेः प्रमाणता॰ अर्थान्यथात्वहेतूत्थदोषज्ञानेनापोद्यत इति॰ [redacted] तदिदमुक्तं वचनस्यमन्नेनन्तविज्ञानमवश्यं कल्पनीयं पदुदुंबरेत्यस्य तु

के॰वि॰ त्यवायस्यापि प्रसंगादित्यत आह वाक्प्रयोगविदिति। अनुमानस्य किं दृष्टाणुक्तमित्यत आह ज्ञानेनेति। धर्महेतुः शब्दज्ञानविरुद्धत्वा

१३ दितिहेतोर्विशेषणासिद्धत्वमिति भावः॥ ननु उत्पथार्थपृष्टे प्रकृत्यर्थाभिधानमसंगतं प्रश्नोत्तरयोर्वैयधिकरण्यप्रसंगादित्य

त आह प्रातिपदिकेति। उदुंबरवर्णानां ताम्रवर्णानामित्यर्थः। प्रमत्तगीत इत्यत्र पूर्वपदे कः कर्त्रि येन ब्रवीत्येतदपेक्षमाणस्य

13 गीत इत्यनेन समासोऽनुपपन्नः इत्यत आह। प्रमादेनेति। तस्य कथं प्रमाणं इत्यत आह कात्यायनेनेति। ननु प्रयाज मंत्रे सुपदानि स

विभक्तिकान्येव पठ्यन्ते। तत्किमनेन वचनेनेत्यत आह प्रयाजेति। ऊह्यमानाया अग्निशब्दप्रकृतिविभक्तिस्तद्वर्ज इत्यर्थः। यद्यपि स

विभक्तिकाः कर्त्तव्या इत्येवश्रूयते तथापि केवलाया विभक्तेः प्रयोगाभावात्प्रकृतिराक्षिप्यते। यद्यपि यत्किंचित्प्रकृतिदुक्ता

याधिभक्तेरूहे श्राव्यतेति तथापि त्वमग्ने प्रयाजानां पुरस्तात्त्वं पश्चादिति दर्शनादग्निशब्द एव विभक्त्यंतऊह्यत इति भावः॥

सप्तकत्वं शुक्रस्यार्त्विजीनशब्दस्योभयपरत्वे युक्तिमाह विद्वानिति। नत्वनिर्दिष्टभक्तयः पठ्येत्यत आह। सुपद्इति। के चिद्विति। सुप

इतिव्याख्याय मान इति शेषः [redacted] शुपेशोति। शोषः षष्ठ्यर्थः तत्संहितकारकाभिधायकत्वेन सुप्तिङोरुभयोरपि संग्रह इति भावः। भाष्ये उरसीत्यादि

अत्र शिरः शब्देन कंठादूर्ध्वतात्वादिस्थानपंक्तिरुच्यते न च बहुः अंजकध्वनुस्वतिस्थानत्वादुरः प्रभृतीनामित्यर्थः। अष्टौस्थानानि वर्णानामुरः कंठः शिरस्तथा जिह्वामू

लं च दंताश्च नासिकोष्ठौ च तालु चेति पाणिनीय शिक्षायां॰ ननु वर्षति मेघे एनं भूमिं सिंचति सदृशमत्युच्यते तत्कथं शब्द एव मत आह॰ कामानामिति॰ मेघउदकमि

वचतुः शृंगत्वादिगुण एवं शिक्षेन ज्ञानपूर्वकं प्रयोगात्कामान्दुहातीत्यर्थः। भाष्ये शब्दं करोतीति॰ परापश्यंतीमध्यमावैखरीति च तत्रस्सुवाग्वस्थासु पूर्वावस्थायाः परावस्था

[redacted]

×तथाग्नेर्देवतायाएकत्वादेकवचनं विभक्तयश्च प्रथमाद्वितीयान्ततीयाषष्ठीसप्तम्यएवेति श्रोतसंप्रदायः॥ =

[illegible]

कर्तृत्वात्॰ महदिति अकारांतो महत्ववाची शब्दः। आविवेश॰ प्रयोज्यतेन आविष्टः सन्नाहं करोतीत्यर्थः। तदावेशफलमाह॰ महता देवेनेति॰ साम्यमैक्यं॰ वाक्यांतर
मपि सूच्यत इति॰ चतुःशृंगमंत्रस्य यज्ञविषयत्वेनान्यैर्वर्णितत्वात् संदिग्धवाग्विषयमंत्रोपन्यास इति भावः। एकैकस्येति॰ नामादिरूपस्य॰ चतुर्थभागं॰ प्रतिपुरुषं
व्यवहारसाधनत्वेन यद्वर्त्तते तस्येत्यर्थः। अनंतदेशशाखासु विप्रकीर्णत्वाच्छास्त्रान्कथंचिद्विद्यापि तुरीयभाग एव ज्ञायत इति प्रतिपुरुषसमवेतां ज्ञानवि
षयत्वात्कौन व्यवहारानित्यता विशेषः। अपवैकैकस्य पदस्य नामादिरूपस्य चतुर्थं भागं वैखर्याख्यमित्यर्थः। वैयाकरणस्तु शब्दस्य बलेन गुणं धकारं वि
दार्यसर्वं जानातीति भावः। वैखर्यादि स्व[redacted] रूपं भर्तृहरिणा विहितं॰ स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा॰ वैखरी वाक्प्रयोक्तृ
णां प्राणवृत्तिनिबंधना॰ केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी॰ प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रवर्त्तते॰ अविभागा तु पश्यंती सर्वतः संहृतक्रमा॰ स्व
रूपज्योतिरेवांतः सूक्ष्मा वागनपायिनीति॰ अत्र क्रमो वर्णक्रमः। अविभागा॰ शब्दार्थरूपविभागरहिता॰ अन्यत्र च॰ यासामिश्रा वरुणसदनादुच्चरंती त्रि
षष्टिं वर्णानंतः प्रकटकरणैः प्राणसंगात्प्रसूते॰ तां पश्यंती प्रथमुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये इति॰ न
निमिषंतीति॰ अनेन ज्ञानसामान्यविषयत्वाभावउच्यते॰ भाष्ये सक्तुमिवेति॰ यत्र व्याकरणे धीरा ध्यानवंतः संतस्तितउना सक्तुमिव ध्यानयुक्तमनसा तत्कर
णकज्ञानेन वाचमकृत साधुभ्यो विविक्तां कृतवंतः तत्करणेन शुचिताः अत्र ब्रह्मप्रतिपादकशब्दार्थयोरभेदबुद्ध्या सख्यायः स॰ मानख्यातयः समा
नज्ञानाः तेनैव दृष्टांतेन सर्वपदार्थे ब्रह्मनिरूपिताभेदज्ञानवंतः सख्यानि साधुज्यानि जानते प्राप्नुवंति यत एषां वाचि भद्रा लक्ष्मीः स्वप्रकाशब्र
ह्मस्वरूपा अधि अधिकं निहिता सन्निहिता भवतीति श्रुत्यर्थः। स च तेईर्धा व इति॰ यतः स च ते रतो दुःशेध्यार्थप्रकाशको भवतीत्यर्थः। तितउशब्दस्ये

विद्यते२

तर्एवमाष्यान्नपुंसकता·चालनीतितउःपुमानितिकोशात्पुंस्त्वमपि·विस्तारेति·तनोतेर्डउःसन्वच्चेतिपुंसन्नेरितिभावः।नन्वेवदितिभून्मिमनुपूत
दाह·वकुच्छिदमिति·अत्रपक्षेतुदधातोःकर्मणिडउःसन्वच्चेतिभावः।ध्यानंज्ञातार्थभावनं·मननसेतिव्यापारपरंनदाह·प्रज्ञानेनेति·भाष्येके
ति·किंतघत्रसत्युज्यानिशमुवंतीतिप्रश्नः।उत्तरयति·यएवेति·ज्ञानेनैवेति·नान्यःपंथाअयनायेतिश्रुतेः।वेदांतेष्विति·सत्यंज्ञानमित्यादिश्रु
तलक्षणादित्यस्यव्याख्यानासनादिति·परिदृष्टा·अज्ञाननिवर्त्तनेप्रभ्वी·भवार्थइति·भाष्यश्चिलसाधनत्वेनतत्र्भवत्वं·ननुदशम्यांपुत्रस्येतिप्रयोजन
स्वरूपगणनेभाष्येउक्तंगत्योपितथैवपप्तेःतोदशम्युत्तरकालमित्यपुक्तमतआह·नैरिति·शिक्षायामिति·नेचदशाः।अंतरंतस्यायस्येत्यर्थः।
त्रिपुरुषान्कमिति·त्रिपुरुषमितिद्विगुःपात्रादित्वात्स्त्रीत्वाभावः।त्रिपुरुषमनुकामयतीतिमूलविभुजादित्वात्कः॥भाष्येकाकुदमिति·घञर्थेक ×भाष्ये॰नरीति·अमनुष्ये×
विधानमितिवदेरधिकरणेकः।संप्रसारणं·षष्ठीतत्पुरुषेशकंध्वादित्वात्पररूपं·पृषोदरादित्वादुकारलोपोवा·नुदप्रेरणेइत्यस्मादधिकरणे ×देवादावरिमिन्नेइति× ×वार्थः।६×
कः·पृषोदरादित्वान्नुशब्दलोपो·निरुक्तस्वरप्येवमित्यन्येषांव्याख्या·सर्वांशोभनायुःप्रतिमा·स्मर्यते·च·सुमीज्वलंतीमालिंगेन्नस्यवै
गुरुतल्पगइति·सुपिप्रिश्छिद्रंविद्यतेयस्यां·ऊषसुषीतिमत्वर्थीयोरः।यथासछिद्रंलोहप्रतिमांप्रविश्याग्निःप्रकाशनइतिदृष्टांतः।अ
ग्निर्हितत्रसमलंभस्मीकृत्यप्रतिमांशुद्धांकरोतिएवंतान्नुदेशंप्राप्यविभक्तयोविभक्तंयंताःश्रद्धाःशारीरंपापमपाकुर्वंतीतिभावः।एवंतर्हि शिवः
ति·वेदस्तिरिक्तविषयएवप्रयोजनान्वाख्यानंननुवेदविषयइत्येवंरूपंविषयविभागं·भाष्येकिंचिदित्यस्यानंतरमाधिजिगांसमानेभ्यइत्य १५
नुषज्यतेकिंचिदित्यस्यचवेदमित्यर्थइत्याह·वेदमप्यधिजिगांसमानेभ्यइत्यर्थइति·भाष्येकिंतत्किंचिदित्यतआह·ओमिति·

एवंचवेदमधिजिगांसमानेभ्योवेदाध्ययनप्रयोजनंकिमितिनान्वाख्यायतइतिप्रश्नः।नन्वोमित्यधिकमतआह·अभ्युपगम्येति·
यथाप्रयोजनावगमंविनावेदेप्रवृत्तिस्तथात्रापिप्रवृत्स्यतीतितात्पर्यं·भाष्येउत्तरमाह·पुराकल्पेइति·संस्कारउपनयनं·स्थानंकंठादि·करण
माभ्यंतरप्रयत्नः अनुप्रदानंबाह्यप्रयत्नः।तेनतदानीमपिकर्मानुष्ठानफलकत्वंवेदस्यतदध्ययनस्यचनित्यत्वंजानंतोनप्रयोजनंपृष्टवंतीति
नकदाचिदपिवेदाध्ययनप्रयोजनोपदेशइतितात्पर्यं·भाष्येआचार्यपदेनशास्त्राध्यापकोभाष्यकृदेवविवक्षितः।इदंशास्त्रमिति·प्रयोज
नाख्यानमित्यर्थः।भाष्येउक्तःशब्दइति·लौकिकानांवैदिकानांचेत्यनेनविषयप्रयुक्तःशब्दउक्तइत्यर्थः।स्वरूपमपीति·अथगौरित्यादिना·प्रयोज
नमपीति·कानिपुनरित्यादिना·अयमुपसंहारोग्रंथस्यविषयप्रयोजननिरूपणमेतावताकृतमितिसूचयितुंतेनैवसंबंधाधिकारिणावुक्तौ
वितिद्रष्टव्यौ·किंयत्नस्थोऽन्यत्र्यऽतरणभावादाह·अन्यतरान्यतमशब्दाविति·कथंपंचपंचनखाइत्ययंनियमइत्यतआह·अर्थितादिति·नि
=परिछिद्यमानंवा·। यम्यमानं·पुनःशब्देनबोध्यमानं·ननुचास्यपरिसंख्यात्वान्नियमव्यवहारोनोपपद्यते·अस्तिचनियमपरिसंख्ययोर्भेदः।पाक्षिकाप्राप्तांशपूरि
पूरणफलोनियमोन्यनिवृत्तिफलाचपरिसंख्येति·नैतदस्ति·नियमेप्यप्राप्तांशपरिपूरणरूपफलबोधनद्वारार्थादन्यनिवृत्तेःसत्वेनाभेद
माश्रित्यपरिसंख्यापीहशास्त्रेनियमपदेन [redacted] प्रायशोव्यवह्रियतइतिनियमोक्तिः।विधिरिति·अपूर्वविधिरित्यर्थः।भाष्येभक्ष्यनियमइ
ति·भक्ष्यानुमितिरूपउपदेशइत्यर्थः।ननुशब्दानामितिपुनरुक्तमतआह·योगरूढइति·अर्थपौनरुक्त्यमाशंक्यनिराकरोति·तत्रेति·चतुर्भिरि
तिभाष्यंयावदेवाध्येष्यतेतावदेवाभ्युपयुक्तंस्यादित्यर्थनिराकरणपरंमित्याह·एकदेशेत्यादि·विद्योपयोगाधारभूतानांकाजानांविधास

=नचासौमीमांसकरीत्यापिनियमोभवितितिवाच्यं·पंचातिरिक्तभक्षणेप्रायश्चित्तविधेरसंगत [illegible] सन्विश्रोतुर्मीमांसविवर्जनादित्यादिस्मृतिव्याकोपाच्चतस्मात्त्रिदोषापिपरिसंख्यैव॥

भाअवितये सिद्धिक ३ =

कै.वि.
१५
15

सप्याधारत्वान्तस्य च करणत्वविवक्षायोध्याः चतुर्षु कालेषु विधीयप्रयुज्यते इति फलितोर्थः। तत्राद्ययोस्तौ द्वयोर्नोपयोगः तृतीये प्रतिष्ठासक्ति
प्सलाभन्नाराधर्शाध्यायाच्चतुर्थे यज्ञाद्यनुष्ठानकाले प्रधानप्रयुक्तप्रायश्चित्ताभावः कर्मसांगता दक्षिणादानादिनेत्येतत्सर्वाध्ययन एव सं
भवतीति भावः। भाष्ये पर्युपयुक्तमिति। समाप्तमित्यर्थः। ननु सामान्यविशेषात्मकत्वाल्लक्षणस्य मतोरनुपपत्तिरत आह। सामान्यविशेषा
विति। भाष्ये कथंजातीयक इति। प्रकारमात्रे थमुः तद्वति जातीयर्। तत्र जातीयरैवार्थपर्याप्तौ सामान्योपक्रमाच्छिंशपावृक्षइतिवत्प्रयो
गः। आकृतिपक्षे केवले इति। तत्र हि द्वयोर्विध्योः परस्परपरिहारेण तत्तज्जात्याक्रांतव्यक्तिविशेषे चरितार्थयोः क्वचिदेकत्र प्रसंगे
परस्परप्रतिबंधात्सत्प्रतिपक्षवदुभयोरप्यप्रवृत्तौ विप्रतिषेधे परमिति विध्यर्थं तस्मिंश्च कृते यदि पूर्वस्य निमित्तमस्ति तर्हि त
दपि भवति यथा भिंधकी पत्र भिंदूहि इति स्थिते परत्वाद्धिभावे कृते पुनः प्रसंगात्क[illegible] सकृद्गताविति न सिध्यति। तथा च
जुहुतात्त्वमित्यत्र जुहुहि इति स्थिते धिभावं बाधित्वा परत्वात्तातङि कृते स्थानिवद्भावात्स्यादेव धिः। व्यक्तिपक्षे तु सकलव्यक्त्यु
देशपक्षेणान्यस्य व्यक्त्यंतरे चरितार्थत्वासंभवाद्विकल्पप्रसंगे नियमार्थं सूत्रं परमेव भवति ननु पूर्वमिति जुहुतात्त्वमित्यादि
सिद्धावपि पुनःप्रसंगेत्वसिद्ध्या भिंधकीत्यादि न सिध्यतीति भावः। तस्यामप्रतीतायामिति। शब्दशक्यत्वेनागृहीतायामित्यर्थः। तदावेशा शिवः
त्। तत्समवायात्। प्रतीयत इति। अविनाभावाच्छब्दजन्यप्रतीतिविषयो भवतीत्यर्थः। उपलक्षणभावेनेति। शक्यतावच्छेदकत्वेनोपल १५
क्षणाभावेनाश्रयणादित्यर्थः। नचैवं जाते[illegible]रप्यभिधेयत्वं अकार्यत्वे पि कार्यतावच्छेदकत्ववच्छक्यत्वे पि शक्यतावच्छेदकत्वस्वीकारात्तत्र

[redacted]

तएवलक्ष्यतावच्छेदकेनलक्षणेतिनैयायिकाभ्युपगमइतिभावः।भाष्येजात्याख्यायामिति· ननुयत्रैकैवाश्रयव्यक्तिस्तत्रलक्षणेथाजातिपरत्वेनाम्नः
संतीतिप्रयोगार्थंजात्याख्यायामितिसूत्रंस्यात्तथानानाजातिवाचकाक्षादिपदेष्वनेकशब्दनिरसार्थंसरूपसूत्रमस्तुतत्कथंसूत्रप्रमाणतेतिचे
त्सत्यमेतत्·परंतुलक्ष्यसिध्यर्थंक्वचित्कस्यचिदाश्रयणमितिसांप्रदायिकाः।अतएवोहतसूत्रयोर्भाष्यकृताप्रत्याख्यास्यमानत्वेप्यदोष
इतिदिक्·२ विप्रतिपत्तेरिति·शब्दानांनित्यत्वेव्यर्थंव्याकरणशास्त्रमितिप्रश्नाशयः।केचित्·मीमांसकाः।वर्णात्मकमिति·पदवाक्येचवर्णसमूहए
वेतितदाशयः।अन्येवैयाकरणाः।अपरे·तएवमुख्याः।पदेवर्णानामिववाक्येपदानांकल्पितत्वात्तेषामर्थवत्त्वमपिकाल्पनिकमितिवाक्यस्यै
वशब्दत्वमितितद्भावः।अन्येत्विति·वैशेषिकादयः।ध्वनिरिति·सचवर्णवर्णात्मकत्वेद्विविधः।संग्रहइति· व्याडिकृतोलक्षश्लोकात्मकोग्रंथः।
भाष्येऽन्यथापीति·एवंचनिष्फलोयंविचारःऽन्यथापिसाधुत्वज्ञानायशास्त्रस्यावश्यकत्वादितिभावः।अथपाणिनिसूत्रव्याख्यानभूतं
वार्त्तिकमवतारयति·कथंपुनरिति·अत एवात्रपाणिनिनामग्रहणं·इतःपूर्वंसर्ववार्त्तिकशास्त्रान्वाख्यानप्रयोजनविषयप्रदर्श
नपरोभाष्यकारस्यैवग्रंथइतिभावः।जातिस्फोटलक्षणइति·तत्तद्वर्णाभिव्यंग्याजातिरेवबोधिकास्फोटइत्युच्यतेतस्याःशक्यत्वइवशक्त
त्वेपिलाघवात्·तदुक्तं·शक्यत्वइवशक्तत्वेजातेर्लाघवमीक्ष्यतां·औपाधिकोवाभेदोस्तुवर्णानांतारमंद्रवदिति·असत्योपाधीति·सर्वेषां
धर्माणांब्रह्मण्यध्यस्तत्वेनशुक्तिरजतादिज्ञानेशुक्त्यादीनांविशेष्यत्ववत्सर्वत्राधिष्ठानतयाभातंब्रह्मैवविशेष्यंविशेष्यमेवचद्रव्यमितिभा
वः।नित्यशब्द पक्षेशक्तिलक्षणसंबंधस्यनित्यत्वेप्यनित्यशब्दपक्षेकथंसंबंधस्यनित्यत्वमतआह·संबंधस्येति·प्रवाहनित्यतयाश

× नित्यः सर्वकालमात्मलाभवान नित्यस्त द्विरुद्धः तत्रामेला [redacted] भमावं भवन्ति निमित्तं पुरस्कृत्य यद्यं नित्योपि सिद्धशब्दाभिधेयो विवक्षितः स्यादनर्थकं सिद्धशब्दोपादानं स्यात् सत्यं तु नियमाव
= नचयत्किंचित्कालमात्मलाभवानेवनित्यमभवात्कुतः सतदृशकत्वात् अन्यथाकाशोऽसिद्धइत्यनियमितिप्रसक्तेः। अभिप्रेतः नित्यत्वमतीयात्सर्वकालमात्मलाभवान्सुतः सदाअविवक्षितः =

तयोः१

कै·वि·

१६ शब्दार्थयो रिव संबंधस्यापि नित्यत्वमिति भावः। भाष्ये सिद्धशब्दस्य कः पदार्थ इति· सिद्धशब्दस्य कोर्थ इत्येव सिद्धे पद पदोपादानात् पदार्थशब्दो रूढ इहा

भिप्रेतः सिद्धशब्दसंबंधी कः पदार्थ इत्यर्थः। कूटस्थेष्विति· कूटमयोघनस्तद्वत्तिष्ठति ये ते षु संसर्गिनाशेपि स्वयमनष्टेष्वित्यर्थः। नन्वयोघन

16 स्यापि न हि नित्यत्वं स्यादत आह· अविचालिष्विति· भाष्ये घावापथिव्यो र्नित्यत्वं व्यवहारनित्यतया बोध्यमेव माकाशस्यापि [illegible]· नन्वेक

पदानीत्युक्ते अक्षर [illegible] त्यस्य पदद्वयात्मकस्योदाहरणत्वमसंगतमत आह· एवशब्द इति· नियमप्रत्यायकसामर्थ्यं दर्शय [illegible] ति· इणापीति· कार्यवा

चिनो ग्रहणाभावे मूलमाह· कार्याणामिति· भाष्ये पएवेति गम्यत इति· वाक्यइव समासेपि सामर्थ्यात्तदतिरिक्तलक्षणाभावो गम्यत इत्यर्थः। प्रतीयमा

नस्येति· एतदणुदित्सूत्र उपपादयिष्यते· ननु निर्युक्तिकं व्याख्यानमयुक्तं विपरीतस्यापि संभवादत आह· न्यायादेति· वृद्धव्यवहारादेव पद

तदर्थसंबंधा [redacted] वधारणादित्यर्थः। स्थितमिति· सिद्धं तु नित्यशब्दत्वादित्यादिव्यवहारालोचनात्तदेवे

